प्रह्लादाख्यो दैत्यः, तदभीष्टानां दानं यस्मात्; पक्षे प्रकृष्टो ह्लादो ब्रह्मानन्दः, तस्य, अभीष्टानां धर्मार्थकामानां च दानं यस्मात्; तस्मिन्। विबुधानां देवानां पण्डितानां च समुद्येन समुदायेन स्तूयमानमपदानं *पूर्वचरित्रं यस्य तस्मिन्*। 'अपदानं कर्म वृत्तम्' इत्यमरः। हिरण्याख्यो योग्यतया हिरण्यकशिपुः, नामैकदेशे नामग्रहणात्; स एव द्विरदः, सिंहवध्यत्वात्; तम्। कीदृशं तम्? अतिशयितमद एवाज्ञानपरिणामत्वाद् ध्वान्तम्, तत्तन्त्रं तदधीनम्, मदपरवशमिति यावत्; पक्षे हिरण्यं धनोपलक्षणम्, द्विरदाः सेनाऽङ्गोपलक्षणम्, मतिरसच्छास्त्रज्ञानम्, तत्संबन्धी मदो येषां तेषां ध्वान्तानां ध्वकारोऽन्ते येषां नाम्नि तेषां माध्वानां तन्त्रं शास्त्रं निहन्तुं शेषक्षोणीभृतः शेषाचलस्यान्तः प्रविलसितं शोभमानं पदं स्थानं यस्याहोबलाख्यक्षेत्रस्य, तस्य गर्भान्मध्यात्, पक्षे, अशेषाणां समस्तानां क्षोणीभृतां राज्ञां मध्ये प्रविलसिते पदे चरणौ यस्याहोबलाख्यस्य पुरुषधौरेयस्य, तस्य क्षेत्रं पत्नी, तस्या गर्भात्, प्रादुर्भूते; धीरे धैर्यशालिनि, पक्षे धियं रातीति धीरः पण्डितस्तस्मिन्; सतां शास्त्राणां योनिः कारणम्, 'यस्य निःश्वसितं वेदाः,' 'छन्दांसि जज्ञिरे तस्मात्' इत्यादिश्रवणात्; सच्छास्त्राण्येव योनिर्ज्ञापकहेतुर्यस्येति वा, 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ० उ० ३-९-२६) इति श्रवणात्, शास्त्रयोनित्वाधिकरणे द्वेधाऽपि व्याख्यानात्; पक्षे सच्छास्त्राणां योनिः कर्ता, ग्रन्थकर्तेति यावत्; तस्मिन्भुवनगुरौ नृसिंहे नरकेसरिणि, नृसिंहनामके च मम भक्तिरस्त्विति प्रार्थना। अत्रोपमेयोपमाया उपमाया अभेदस्य वा ध्वनिः। श्लेषोऽलंकारः। सोऽपि च प्रकृतोभयविषयकः सभङ्गोऽभङ्गश्च। स्रग्धरा वृत्तम्॥ १॥

May my devotion be unto Lord (my preceptor) Nṛ-siṃha, the bestower of Prahlāda's heart's desires

(of Supreme Bliss as well as other goals of human desire), whose glorious deeds of old have been extolled by the celestial hordes (assemblage of the wise), who sprang forth in the holy place of Aho-bala *effulging* amidst the region of mount S'eṣa (who came out of the loins of the spouse of Aho-bala, whose feet were ever present in the hearts of one and all of the princes) to slay the elephant Hiraṇya influenced by the extreme rut of darkness (to refute the tenets of the Dhvānta-s [Mādhva-s, the followers of Madhva] filled with the pride of gold, elephants and their false doctrines), the Brave One (one brimming with learning), the fountain-source of sacred lore, (the author of sacred books) and the father of the Universe (the spiritual guide of the world). (1)

आ प्राचः कामरूपाद् द्रुहिणसुतनदप्लाविताद्‌आ प्रतीचो
[1]गांधारात्सिन्धुसान्द्राद्रघुवरचरितादा च सेतोरवाचः ।
आ केदारादुदीचस्तुहिनगहनतः सन्ति विद्वत्समाजा
ये ये तानेष यत्नः सुखयतु समजान्कश्चमत्कर्तुमीष्टे ॥

कामरूपगांधारौ देशौ । सेतुकेदारौ क्षेत्रे । द्रुहिणसुतसिन्धू नदविशेषौ । विदुषां विद्योपासकानां समाजाः, 'न शिल्पादिज्ञानयुक्ते विद्वच्छब्दः प्रयुज्यते' इत्यादिना विद्वच्छब्दस्योपासकपरतायास्त्रिंशत्याम् (श्लो० ८५) प्रदर्शनात् । समजाः पशुगणाः । 'पशूनां समजोऽन्येषां समाजः' इत्यमरः ॥ २ ॥

[1] ०सिन्धुसार्द्राद्रघु०

May this attempt of mine satisfy the assemblies of learned men (to be met with) as far to the east as Kāma-rūpa over which the river Brahma-putra flows, as *far to the* west as Gāṃ-dhāra, profusely watered by the Indus, as far to the south as Setu hallowed by the foot-prints of Raghu-vara, and as far to the north as Kedāra, thickly covered with snow. Who has the power to gratify multitudes of brutes ? (2)

स जयति महान्प्रकाशो यस्मिन्दृष्टे न दृश्यते किमपि ।
कथमिव तस्मिञ्ज्ञाते सर्वं विज्ञातमुच्यते वेदे ॥ ३ ॥

स सर्वेषामात्मत्वेन प्रसिद्धः, महान्देशकालाद्यनवच्छिन्नः पराप्रकाश्यः, प्रकाशः सर्वदाऽनावृतात्मस्वरूपज्योतिः, 'स्वरूपज्योतिरेवान्तः' इति रहस्यागमात्, 'न तत्र सूर्यो भाति' (क० उ० ५-१५) इत्यादिश्रवणाच्च । जयति सर्वोत्कर्षेण वर्तते । यस्मिन्नधिष्ठाने दृष्टे निर्विकल्पात्मकचरमवृत्तिविषयीकृते सति किमपि दृश्यं न दृश्यते, अधिष्ठानज्ञाननाश्यत्वात् । अत एवैकविज्ञानेन सर्वविज्ञानं श्रुतावुक्तं कथं संगच्छत इति साश्चर्यमाह—कथमिवेति । अथ वा, विवर्तवादं वेदान्तिसंमतं परिणामवादी तान्त्रिको दूषयति—कथमिवेति । तन्मते मृद्घटादिदृष्टान्तानुपपत्तिरित्यर्थः । अत्रेयं तान्त्रिकप्रक्रिया—'इच्छामि,' 'जानामि' इत्यादावुत्तमपुरुषान्तर्भासमानं स्फुरणान्वयि ज्ञानमेव प्रकाशाभिधं ब्रह्म । तच्च सर्वज्ञत्वसर्वेश्वरत्वसर्वकर्तृत्वपूर्णत्वव्यापकत्वादिशक्तिसंवलितम् । तस्य चानन्दरूपांश एव स्फुरणं पराऽहंता, विमर्शः, परा ललिता भट्टारिका, त्रिपुरसुन्दरीत्यादिपदैर्व्यवह्रियते । उक्तं च विरूपाक्षपञ्चाशिकायां विश्वशरीरस्कन्धे—'ईश्वरता कर्तृत्वं स्वतन्त्रता

चित्स्वरूपता चेति । [1]'एतेऽहंतायाः किल पर्यायाः सद्भिरुच्यन्ते ॥' इति । पराहंतामन्तरेणेदंताया असंस्फुरणादहमिदमोः ससंबन्धिकत्वादिदंपदगम्यस्य दृश्यस्याहंतारूपशक्त्या तद्विशिष्टब्रह्मणा वा जन्यत्वम् । तच्च दृश्यं तत्परिणाम एव, 'तस्यां परिणतायां तु न कश्चित्पर इष्यते' इति वामकेश्वरतन्त्रात्, 'वाचाऽऽरम्भणं विकारः' (छा० उ० ६-१-४) इत्यादिश्रुतीनां तत्रैव स्वारस्याच्च । शक्तिशक्तिमतोरुपादानोपादेययोरत्यन्तमभेदः, न पुनरौपनिषदादिवद्भेदाभेदौ । अत एव 'सर्वं खल्विदं ब्रह्म' (छा० उ० ३-१४-१) इति सामानाधिकरण्यमभेदे, न पुनर्बाधायाम् । अद्वैतश्रुतयः सर्वा अप्येतदभिप्रायिका एवाविरुद्धाः । सर्वप्रमाणमूर्धन्यया श्रुत्या तदनुसारितन्त्रैश्चाद्वैते कथिते, तद्विरुद्धत्वेन भासमानः कार्यकारणयोर्भेदांश एव कल्पित आस्तां न पुनः सर्वोऽपि प्रपञ्चः । 'नेह नानाऽस्ति किंचन' (बृ० उ० ४-४-१९) इत्यादिश्रुतिष्वपि भेदांशस्यैव निषेधो न प्रपञ्चस्य । 'एकमेवाद्वितीयम्' इत्यादौ श्रूयमाणो भेदवत्प्रपञ्चाभावोऽपि विशेषणाभावप्रयुक्त एव । अत एव भामत्यां हाटकमकुटग्रन्थे भेदस्यैव हाटकन्यूनसत्ताकत्वं न मकुटस्योक्तम्, परिणामस्य परिणामिसमानसत्ताकत्वावश्यिकत्वात् । 'मायामात्रमिदं द्वैतम्' (गौड० १-१७) इत्यत्रापि द्वैतशब्देन भेदस्यैव मिथ्यात्वमुच्यते, न पुनर्भेदवतः ; तथात्वे तु प्रतियोगितासंबन्धेन जगत इवानुयोगितासंबन्धेन ब्रह्मणोऽपि भेदवत्त्वस्य सत्त्वात्सदसद्भ्यामभावो निरूप्यत इति न्यायसिद्धत्वाविशेषान्मिथ्यात्वापत्तेः । ततश्च श्रुतेरपि परिणामवाद एव संमतः सिध्यति । भगवता व्यासेनापि 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (ब्र०सू० १-४-१३) इत्यस्मिन्नधिकरण एकविज्ञानेन सर्वविज्ञानप्रतिज्ञां मृद्धटनखनिकृन्तनादिदृष्टान्तम् 'बहु स्यां प्रजायेय' (तै० उ० २-७)

[1] एते चाहंतायाः

इत्यभिध्योपदेशादिकं चानुसंदधानेन परिणामवाद एवाभिप्रेतः, कण्ठरवेणोक्तश्च 'आत्मकृतेः परिणामात्' (ब्र० सू० १-४-२६) इति सूत्रे। भाष्यकारैरपि तत्र विवर्तवादानुसारेण व्याचक्षाणैरपि सौन्दर्यलहर्याम् 'मनस्त्वं व्योम त्वम्—' (३५) इति श्लोके 'त्वयि परिणतायाम्' इति स्वाभिमतः परिणामवाद एव स्फुटीकृतः। अस्मिन्पक्षे रहस्यनामसहस्रे 'मिथ्याजगदधिष्ठाना' (७३५) इत्यादौ श्रूयमाणं मिथ्यात्वं तु स्वानतिरिक्तरूपत्वम्, घटादिरूपेणानित्यत्वं ब्रह्मरूपेण नित्यत्वम्, मृद्घटयोरभेदेऽपि घटरूपेण ध्वस्तत्वं मृद्रूपेणाध्वस्तत्वं चेत्यादिवद्विरुद्धधर्मनिरासादिकमूह्यमित्यादिकः शांभवानन्दकल्पलतायां विस्तरः ॥ ३ ॥

That Great Radiance triumphs, at the sight whereof whatsoever else is not seen. While so, how is it said in the Veda-s that all is known on Its being known! (3)

इममेवार्थं श्लोकद्वयेनाह—

नैसर्गिकी स्फुरत्ता विमर्शरूपाऽस्य वर्तते शक्तिः।
तद्योगादेव शिवो जगदुत्पादयति पाति संहरति ॥ ४ ॥

इहोत्पादनादि त्रयं तिरोधानानुग्रहयोरुपलक्षणम् ॥ ४ ॥

It has the S'akti (Power) of Vimars'a which may be defined as inherent throbbing. It is in conjunction with S'akti that S'iva creates, sustains and destroys the world. (4)

साऽवश्यं विज्ञेया यत्परिणामादभूदेषा ।
अर्थमयी शब्दमयी चक्रमयी देहमय्यपि च सृष्टिः ॥ ५ ॥

अवश्यम्, सर्वविज्ञानसाधनत्वान्मोक्षादिपुरुषार्थप्रदत्वाच्च । अर्थमयी, शिवादिक्षित्यन्तषट्त्रिंशत्तत्त्वरूपा । शब्दमयी, पराऽऽदिवैखर्यन्ता । चक्रमयी, बिन्द्वादिभूगृहान्ता । देहमयी, सूक्ष्मादिस्थूलान्ता ॥ ५ ॥

She (S'akti) by whose transformation this creation in the form of Artha-s (objects), S'abda-s (words), Cakra-s (plexuses) and Deha-s (bodies) exists, should by all means be unravelled by us. (5)

तज्ज्ञानार्थमुपाया विद्या लोके चतुर्दश प्रोक्ताः ।
[1]तेष्वपि च सारभूता वेदास्तत्रापि गायत्री ॥ ६ ॥

चतुर्दश विद्याः—चत्वारो वेदाः षडङ्गानि न्यायो मीमांसा पुराणं धर्मशास्त्रं चेति । तन्त्राणां धर्मशास्त्रेऽन्तर्भावः । तेषां प्रामाण्यसमर्थनं [2]त्वस्मदीये त्रिपुरसुन्दरीबाह्यवरिवस्याविधौ द्रष्टव्यम् । तन्त्रराजव्याख्याने च विस्तरेण तन्त्राणां धर्मशास्त्रेऽन्तर्भावः प्रपञ्चयिष्यते । एवं च न शिष्टाकोपाधिकरणस्थवार्त्तिकविरोधः, शास्त्रपरिमाणानतिक्रमात् ॥ ६ ॥

The fourteen Vidyā-s are the expedients to be employed by us in this world to understand Her aright. Even among them the most essential are the Veda-s and therein especially the Gāyat-trī. (6)

[1] तास्वपि.

[2] चास्मदीये.

तस्या रूपद्वितयं तत्रैकं यत्प्रपठ्यते (ऽ)स्पष्टम् ।
वेदेषु चतुर्ष्वपि परमत्यन्तं गोपनीयतरम् ॥ ७ ॥

तस्या गायत्र्याः । स्पष्टमस्पष्टं चेति पदच्छेद आवृत्त्या । चरणत्रयम् 'तत्सवितुः' इत्यादि स्पष्टम् । 'परोरजसे सावदोम्' इति चतुर्थचरणं त्वस्पष्टमित्यर्थः । परं श्रीविद्याऽऽख्यं द्वितीयं रूपम् ॥ ७ ॥

She (Gāyat-trī) is of two forms: one of them, clear, being what is recited in the four Veda-s; the other (S'rī-vidyā), not clear, being very much esoteric. (7)

यद्यपि तन्त्रराजादौ सौन्दर्यलहर्यां च हादिविद्याया एव प्रथममुद्धारो दृश्यते, तथाऽपि 'श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा' इति वचनात्, षोडशीघटकत्वाच्च, 'यदक्षरैकमात्रेऽपि,' 'यदेकादशमाधारम्' इत्योदिरहस्यार्थप्रतिपाद्यक्षरशालित्वाच्च, त्रिशत्यामस्या एवादराच्च, त्रिपुरोपनिषद्येतन्मूलकत्वेनैवान्यासामुद्धाराच्च, योगिनीहृदयादावुक्तानामिहापि वक्ष्यमाणानामर्थानामत्रैव स्वारस्याच्च, शाङ्खायनश्रुतौ 'चत्वार ईं बिभ्रति' इत्यस्यामृचि च प्रथममस्या एवोद्धाराच्च कादिविद्यायाः प्राधान्यमिति [1]द्योतयंस्तस्याः प्रतीकमादत्ते—

कामो योनिः कमलेत्येवं [2]सांकेतिकैः शब्दैः ।
व्यवहरति न तु प्रकटं यां विद्यां वेदपुरुषोऽपि ॥ ८ ॥

1 द्योतयन्नस्याः
2 सकेतितैः

'कामो योनिः कमला वज्रपाणिर्गुहाहसा मातरिश्वाऽभ्रमिन्द्रः। पुनर्गुहासकला मायया च पुरूच्येषा विश्वमाताऽऽदिविद्या ॥' इति शाङ्खायनश्रुतिः। कामो मातरिश्वा च ककारः। योनिरेकारः। कमला तुरीयः स्वरः। वज्रपाणिरिन्द्रश्च लकारः। गुहाद्वयं माया च लज्जाबीजम्। हसेति सकलेति च स्वरूपम्। गुहया सह समासाद्बहुवचनं न पुनः सकारो दीर्घः। एवं लकारोऽपि। अभ्रं हकारः। एतादृशैः [1]सांकेतिकैः शब्दैर्व्यवहारादत्यन्तगोपनीयत्वं समर्थितं भवति ॥ ८ ॥

Even the Veda-puruṣa talks of such Vidyā in such conventional terms as *Kāmo yoniḥ kamalā*, *etc.* and not explicitly. (8)

विद्यावर्णानुद्धरति—

क्रोधीशः श्रीकण्ठारूढः कोणत्रयं लक्ष्मीः।
मांसमनुत्तररूढं वाग्भवकूटं प्रकीर्तितं प्रथमम् ॥ ९ ॥
शिवहंसब्रह्मवियच्छक्राः प्रत्येकमक्षरारूढाः।
द्वैतीयीकं कूटं कथितं तत्कामराजाख्यम् ॥ १० ॥
शिवतो वियतो मुक्तं तृतीयमिदमेव शक्तिकूटाख्यम्।
हृल्लेखानां त्रितयं [2]कूटत्रितयेऽपि योज्यमन्ते स्यात् ॥ ११ ॥

क्रोधीशो ब्रह्मा च ककारः। श्रीकण्ठोऽनुत्तरमक्षरं चाकारः। तमारूढस्तेन युक्तः। कोणत्रयं योनिः। लक्ष्मीः कमला। मांसं शक्रश्चेन्द्रः।

[1] संकेतितैः

[2] कूटत्रितयस्य.

शिवो वियच्च हकारः । हंसः सकारः । अक्षरसमूहात्मकत्वात्कूटत्वव्यपदेशः ॥ ९–११ ॥

Krodhīs'a (*K*) along with S'rī-kāṇṭha (*a*), Koṇa-traya, *i.e.*, triangle (*E*), Lakṣmī (*Ī*), Māṃsa (*L*) along with An-uttara (*a*), constitute the first Group known as Vāg-bhava-kūṭa. (9)

S'iva (*H*), Haṃsa (*S*), Brahman (*K*), Viyat (*H*), S'akra (*L*), these severally conjoined with Akṣara (*a*), constitute the second Group known as Kāma-rāja-*kūṭa*. (10)

The selfsame Group, rid of S'iva (*Ha*) and Viyat (*Ha*), constitutes the third one known as S'akti-kūṭa. At the end of these three Groups should be added three Hṛl-lekhā-s (one in each). (11)

हृल्लेखायाः स्वरूपं तु व्योमाग्निर्वामलोचना[1] ।
बिन्द्वर्धचन्द्ररोधिन्यो नादनादान्तशक्तयः ॥ १२ ॥
व्यापिकासमनोन्मन्य इति द्वादशसंहतिः ।
बिन्द्वादीनां नवानां तु समष्टिर्नाद उच्यते ॥ १३ ॥

व्योम हकारः केवलो न त्वकारविशिष्टः । अग्नी रेफस्तादृशः । [2]वामलोचनेकारः । बिन्द्वादयो नवापि सूक्ष्मसूक्ष्मतरसूक्ष्मतमकालैरुच्चार्या ध्वनिविशेषाः, वर्णविशेषा वा । न च ककारादिवत्स्पष्टमनुच्चार्यत्वात्तन्त्री-

[1] वामलोचनम्.
[2] वामलोचनमीकारः

स्वरतुल्यत्वेन श्रूयमाणत्वाच्च कारप्रत्ययाद्यभावाच्च 'बीजबिन्दुध्वनीनां च त्रिकूटेषु ग्रहात्मिका' इत्यादौ ध्वनिपदेनैव तन्त्रेषु व्यवहाराच्च न वर्णत्वमर्धचन्द्रादेरिति वाच्यम्, अनुस्वारविसर्गादावुक्तहेतुसत्त्वेऽपि वर्णत्वस्येष्टत्वात्। कथमन्यथा 'त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः' (पा०शि० ३) इति प्रतिज्ञाय 'अनुस्वारो विसर्गश्च—' इति परिगणनं शिक्षायां संगच्छेत? न च तादृशसंख्याविरोधादेव नात्र 'वर्णत्वम्, तत्र' स्पष्टोच्चार्याणामेव गणनात्। न च ताल्वादिपरिगणितस्थानानभिव्यङ्ग्यत्वान्न वर्णत्वम्, तदनभिव्यङ्ग्यत्वस्य पश्यन्त्यादावव्याप्तेः, 'चत्वारि वाक्परिमिता पदानि' (ऋ०२-३-२२) इति श्रुत्या वर्णसमूहात्मकपदत्वस्य स्पष्टमुक्तत्वाच्च। अत एव चतुःशतीशास्त्रे नादस्यार्थवर्णनं संगच्छते। न च रथघोषवत्पदार्थस्मारकत्वोपपत्तिः; तत्र हि तत्कालकरणीयत्वसंबन्धेन माहेन्द्रस्तोत्रोपाकरणस्य स्मृतिविषयताया वाचनिकत्वेन रथघोषसामान्यस्य लौकिकादिसाधारणस्य स्मारकत्वाभावेन तस्य तत्र शक्तेरयोगात्, प्रकृते तु न तथेति वैषम्यात्; 'हृल्लेखात्रयसंभूतैस्तिथिसंख्यैस्तथाऽक्षरैः' इत्यादौ प्रतिहृल्लेखं हकाररेफेकारानुस्वारनादपञ्चकमिति पञ्चदशाक्षराणीत्युक्त्या, नादेऽक्षरत्वव्यवहारस्यासकृद्योगिनीहृदये 'भूमिश्चन्द्रः शिवो माया शक्तिः कृष्णाध्वमादनौ। अर्धचन्द्रश्च बिन्दुश्च नवार्णो मेरुरुच्यते। महात्रिपुरसुन्दर्या मन्त्रा मेरुसमुद्भवाः॥' इति ज्ञानार्णवादावप्यसकृद्व्यवहारस्य दर्शनाच्च। ध्वनिपदेन व्यवहारस्तु तत्तुल्यत्वाल्लक्षणया ध्वनिपर्यायनादपदवाच्यत्वान्नेयार्थरूपलक्षणया वा नेय इति दिक्। एवं च प्रथमतृतीयकूटे अष्टादशवर्णात्मके; [1]मध्यमकूटं तु चतुरधिकम्; संहत्याष्टपञ्चाशद्वर्णात्मिका विद्येति सिद्धम्। यद्यपि बिन्दुविनिर्मुक्तानामष्टानामेव नादसंज्ञा

[1] मध्यकूटं.

मन्त्रशास्त्रे, तथाऽपि व्यवहारसौकर्याय तत्सहितानामेव साऽत्र कृतेति ध्येयम् ॥ १२, १३ ॥

The form of Hṛl-lekhā is made up of the twelve letters—Vyoman (*H*), Agni (*r*), Vāma-locanā (*ī*), Bindu (*ṃ*), Ardha-candra, Rodhinī, Nāda, Nādānta, S'akti, Vyāpikā, Sa-manā and Un-manī. The Samaṣṭi (aggregate) of the nine beginning with Bindu is known as Nāda. (12, 13)

सिद्धमेवाह—

प्रथमेऽष्टादश वर्णा द्वाविंशतिरक्षराणि मध्ये स्युः।
प्रथमेन तुल्यमन्त्यं संघातेनाष्टपञ्चाशत् ॥ १४ ॥

In the first Group there are eighteen letters; in the middle Group there are twenty-two letters; the last Group is similar to the first; thus there are in the aggregate fifty-eight. (14)

वर्णानां कालानाह—

मात्राद्वितयोच्चार्या कामकला च त्रिकोणा च ।
बिन्दुरहितहृल्लेखा मात्राकालत्रयोच्चार्याः ॥ १५ ॥
अन्येषां वर्णानां मात्राकालोऽर्धमात्रया सहितः ।
बिन्दोरर्धं मात्रा परे परे चापि पूर्वपूर्वार्धाः ॥ १६ ॥
संहत्यैकलवोनो मात्राकालोऽस्य नादस्य ।

मात्रा लघ्वक्षरस्य कालः। तद्द्विगुणो गुर्वक्षरस्य। अत एव कामकला कमला त्रिकोणा योनिश्च द्विमात्रा। हृल्लेखायां द्वयोर्व्यञ्जनयोरेका मात्रा, कामकलाया द्वे मात्रे इति तिस्रः। अन्येषामकारसहितानां [1]ककारादिदशवर्णानाम्। बिन्दोरपि व्यञ्जनत्वादर्धा मात्रा, 'एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रकम्॥' इति वचनात्। परे परे, अर्धचन्द्ररोधिन्यादयः, पूर्व-पूर्वार्धाः; अर्धचन्द्रस्यार्धकालो रोधिन्याः, रोधिन्यर्धकालो नादस्येत्यादि-क्रमेण कालवन्तः। अयं भावः—कालपरमाणुर्लव इत्युच्यते, 'नलिनीपत्र-संहत्याः सूक्ष्मसूच्यभिवेधने। दले दले तु यः कालः स कालो लवसंज्ञितः। अतः सूक्ष्मतमः कालो नोपलभ्यो भृगूद्वह॥' इति वचनात्। षट्पञ्चा-शदुत्तरशतद्वयलवैरेका मात्रा। बिन्दोरष्टाविंशत्युत्तरशतं लवाः। अर्धचन्द्रस्य चतुःषष्टिः। रोधिन्या द्वात्रिंशत्। नादस्य षोडश। नादान्तस्याष्टौ। शक्तेश्चत्वारः। व्यापिकाया द्वौ लवौ। समनाया एको लवः। उन्मनायास्तु नास्त्येव कालः। यद्यपि योगिनीहृदये चक्रसंकेते, 'दीपाकारोऽर्धमात्रश्च' इत्यनेन बिन्दोः कालमुक्त्वाऽर्धचन्द्रादेः शक्तिपर्यन्तस्य चतुरंशाष्टांशषोड-शांशादिरूपभागद्वैगुण्यं कालस्योक्त्वा शक्त्यादीनां पूर्वपूर्वद्विगुणांशकालवत्त्वं सामान्येनोक्तम्, 'चतुःषष्टिस्तदूर्ध्वं तु द्विगुणं द्विगुणं ततः' इति, तेन च वचनेन मात्राया द्वादशोत्तरपञ्चशततमो भाग उन्मनाकालः, मात्रास्वरूपं च द्वादशोत्तरपञ्चशतलवात्मकत्वमेव प्रतीयते, अत एव 'देशकालान-वच्छिन्नं तदूर्ध्वं परमं महत्' इत्युत्तरग्रन्थेऽप्युन्मनायाः परत एव कालानवच्छेद उक्त इति व्यक्तं प्रतीयते; तथाऽपि 'चतुःषष्टिः—' इति श्लोकस्य शक्तेश्चतुःषष्टितमो मात्राभागः, तदूर्ध्वं द्विगुणं व्यापिकाया

[1] कादिदश०.

अष्टाविंशत्युत्तरशततमो भागः, ततो द्विगुणं समनायाः षट्पञ्चाशदुत्तरशतद्वयात्मको भागः, [1]इत्यर्थस्ततस्तदूर्ध्वमिति पदाभ्यां द्विगुणपदद्वयेन च स्पष्टं [2]प्रतीयते ; अत एवोत्तरार्धे 'शक्त्यादीनां च मात्रांऽशो मनोन्मन्यास्तथोन्मनी' इत्यत्र मनोन्मनीति पदस्य समनापर्यायस्य समनापर्यन्ताना-मित्यर्थकत्वमङ्गीकृत्य शक्त्यादीनां तिसृणामित्यमृतानन्दैर्व्याख्यातम् । नादस्य बिन्द्वादिनवकस्य ॥ १५–१६- ॥

Kāma-kalā (*Ī*) and Tri-koṇā (*E*) are to be pronounced with two Mātrā-s. Hṛl-lekhā-s devoid of Bindu are to be pronounced with three Mātrā-periods. (15)

In the case of the other letters the period is half a Mātrā added on to a Mātrā (*i.e.*, one and a half Mātrā-s). Bindu's period is half a Mātrā. The others coming thereafter in succession will have one half of the period of the letters immediately preceding each of them. (16)

Computing in the above manner, (it will be found that) this Nāda comes to have one Mātrā less one Lava. (16)

एकादश वाक्कूटे सार्धा एकादशोदिता मध्ये ॥ १७ ॥
सार्धा अष्टौ शक्तावेकैकलवोनिता मात्राः ।
संहत्यैकत्रिंशन्मात्रा मन्त्रे लवत्रयन्यूनाः ॥ १८ ॥

शक्तौ तृतीयकूटे ॥ १७, १८ ॥

[1] इत्यर्थस्य.
[2] प्रतीतेः

In the Vāk-kūṭa there are eleven Mātrā-s, in the middle one there are eleven and a half, and in the S'akti-kūṭa eight and a half, less one Lava in each case. (Thus) there are, on the whole, thirty-one Mātrā-s less three Lava-s in the Mantra. (17, 18)

उत्पत्तिस्थानयत्नावाह—

कण्ठे च कण्ठतालुनि दन्तेषु मूर्ध्नि नासायाम् ।
स्पृष्टविवाराद्यान्तरबाह्यैर्यत्नैस्तदक्षरोत्पत्तिः ॥ १९ ॥

ककारत्रयमकारदशकं हकारपञ्चकं च कण्ठे । द्वितीयमक्षरं कण्ठतालुनि । प्राण्यङ्गत्वादेकवद्भावः । ईकारचतुष्टयं तालुनि । लकारत्रयं सकारद्वयं च दन्तेषु । रेफत्रयं तु मूर्ध्नि । बिन्द्वादिनवकत्रयं नासायाम् । स्पृष्टेति । ककाराः स्पृष्टयत्नाः । अकाराः संवृताः । ईकारा एकारश्च विवृताः । रेफा लकाराश्चेषत्स्पृष्टाः । हकाराः सकारौ चेषद्विवृताः । बिन्द्वादयः संवृततमाः । इत्याभ्यन्तरो यत्नः । ककारा विवारश्वासाघोषवन्तोऽल्पप्राणवन्तश्च । सकारौ महाप्राणवन्तौ विवारादिमन्तौ च । स्वराः सर्वेऽप्युदात्ताः । रेफा लकाराश्च संवारनादघोषाल्पप्राणवन्तः । हकारास्तु संवारादित्रयवन्तो महाप्राणवन्तश्च । बिन्द्वादयस्त्वात्यन्तिकसंवारादिचतुष्कवन्तः । इति बाह्यः प्रयत्नः ॥ १९ ॥

These letters (of the Mantra) have their origin in the throat, the throat and palate, the palate, the teeth, the roof of the mouth, and the nose, (and are pronounced) with the aid of internal efforts, Spṛṣṭa, etc., and external efforts, Vivāra, etc., as the case may be. (19)

अथ वर्णानां स्थितिस्थानं रूपमाकारं चाह—

प्रलयाग्निनिभं प्रथमं मूलाधारादनाहतं स्पृशति ।
तस्मादाज्ञाचक्रं द्वितीयकूटं तु कोटिसूर्याभम् ॥ २० ॥
तस्माल्ललाटमध्यं तार्तीयं कोटिचन्द्राभम् ।
मालामणिवद्वर्णाः क्रमेण भाव्या उपर्युपरि ॥ २१ ॥

मूलाधारादित्यादि पञ्चमीत्रयं ल्यब्लोपे । मूलाधारमारभ्येत्यर्थः । तस्मादनाहतमारभ्य । तस्मादाज्ञाचक्रमारभ्य । इदं च स्थानत्रयं बिन्द्वादिरहितकूटत्रयस्यैव । सुषुम्णाऽऽख्यनाडीमूलाग्रयोर्द्वे सहस्रदलकमले, मध्ये चाष्टदलषड्दलादीनि त्रिंशत्पद्मानि सविस्तरं स्वच्छन्दसंग्रहादौ प्रपञ्चितानि । तत्र गुदोपरि द्व्यङ्गुलोर्ध्वे लिङ्गे नाभौ हृदि कण्ठे भ्रूमध्ये च मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञानामकानि चतुःषड्दशद्वादशषोडशद्विदलानि द्विद्विग्रन्थिमध्यसंदष्टानि चक्रपदवाच्यान्यपि षट् पद्मानि सन्तीत्यन्यत्र विस्तरः ॥ २०, २१ ॥

The first (Kūṭa), which has the blaze of the diluvian Fire, touches An-āhata, beginning from Mūlādhāra. The second (Kūṭa), which has the brilliance of ten million suns, touches Ājñā-cakra therefrom (from An-āhata). The third (Kūṭa), which has the effulgence of ten million moons, touches Lalāṭa-madhya (the middle of the forehead) thence (from Ājñā-cakra). The letters (constituting the three Kūṭa-s) have to be regarded as so many beads in a Rosary, one above the other. (20, 21)

आधारोत्थितनादो गुण इव परिभाति वर्णमध्यगतः ।

अत्रेयं शब्दसृष्टिप्रक्रिया—वटबीजान्तर्गतवटवृक्षीयसूक्ष्मरूपतुल्यशब्दसृष्टिसूक्ष्मरूपशालिनी पूर्वोक्तरूपा, त्रिपुरसुन्दर्येव तादृशसूक्ष्मरूपवत्त्वप्रवृत्तिनिमित्तकपरापदवाच्या । सैव च माति तरति कायतीति च व्युत्पत्त्या मातृकेत्युच्यते । तस्यां च निर्विकारायामप्यनादिसिद्धप्राण्यदृष्टवशात्स्वान्तःसंहृतविश्वसिसृक्षोत्पद्यते । ततः स्रष्टव्यपदार्थानालोचयति, 'तदैक्षत बहु स्यां प्रजायेय' (छा० उ० ६-२-३) इति श्रुतेः । तादृशमीक्षणमेव प्रवृत्तिनिमित्तीकृत्य तस्यां पश्यन्तीति पदं प्रवर्तते । सैव च पश्यन्त्याख्या मातृका करणसरणित उत्तीर्णत्वादुत्तीर्णेत्युच्यते । तदवयवाश्च वामाऽऽदयोऽष्टौ शक्तयोऽन्यत्र प्रपञ्चिताः । अतः सैव व्यष्टिसमष्टिवेषेण नवविधा । ततो नव नादा अविकृतशून्यादयो जाताः । तत्समष्टिश्च नादध्वन्यादिपदवाच्या नातिसूक्ष्मा परावन्नातिस्थूला वैखरीवदतो मध्यमाऽऽख्या मातृका मध्यमावयवरूपमविकृतशून्यस्पर्शनादध्वनिबिन्दुशक्तिबीजाक्षराख्यं नादनवकं मूलाधारादिषट्के नादे नादान्ते ब्रह्मरन्ध्रे च स्थितम् । नवभिर्नादैरकचटतपयशळाख्यवर्गनवकवती वैखर्याख्या मातृका जाता, वै निश्चयेन स्पष्टतरत्वात्खं कर्णविवरवर्तिनभोरूपश्रोत्रेन्द्रियं राति गच्छति, तज्जन्यज्ञानविषयो भवतीति व्युत्पत्तेरित्याद्यन्यतो विस्तरः । एवं च ककारादौ कत्वादिवर्णधर्माणां षड्जत्वादिध्वनिधर्माणां चानुभूयमानत्वात्परिणामे परिणामिनोऽनुस्यूतताया मृद्घटे दर्शनाच्च वर्णेषु नादोऽनुस्यूतः । तन्तुविशेषजन्यः पटविशेषो वर्णकपदवाच्यः । तत्र कप्रत्ययपरित्यागेन प्रयोगस्त्वक्षरवाचकवर्णपदेन श्लेषार्थः । गुण इव वर्णकाख्यपटविशेषोपादानभूततन्तुविशेषवन्मालामण्याधारसूत्रवच्चेत्यर्थः । वर्णमध्यगत इत्यस्य द्वयोर्वर्णयोर्मध्यभागे वर्णशरीरान्तर्भागे च स्थित इत्यर्थः । अयं भावः—द्वयोर्वर्णयोर्मध्यभागे मणिद्वयमध्यभागस्थशुद्धसूत्र-

वच्छुद्धनादस्य भानम्, वर्णशरीरान्तर्भागे तु पटाभेदेन संवलिततन्तुवद्घटान्तर्मृद्वच्च तत्तद्वर्णाभेदेनैव नादस्य भानम, न पुनस्तत्र मण्यन्तर्गतसूत्रदृष्टान्तः, तस्य मणितोऽत्यन्तभिन्नत्वादिति ॥ २१ ॥

Nāda emanating from Mūlādhāra functions as the string passing through the several letters, forming with them a composite whole, even as the threads in a piece of cloth. (21-)

अथावशिष्टस्य बिन्द्वादिनवकस्य स्थितिस्थानरूपाकारानाह—

मध्येफालं बिन्दुर्दीप इवाभाति वर्तुलाकारः ॥ २२ ॥
तदुपरि गतोऽर्धचन्द्रोऽन्वर्थः कान्त्या तथाऽऽकृत्या ।
अथ रोधिनी तदूर्ध्वं त्रिकोणरूपा च चन्द्रिकाकान्तिः ॥
नादस्तु पद्मरागवदण्डद्वयमध्यवर्तिनीव सिरा ।
नादान्तस्तडिदाभः सव्यस्थितबिन्दुयुक्तलाङ्गलवत् ॥ २४ ॥
तिर्यग्बिन्दुद्वितये वामोद्गच्छत्सिराऽऽकृतिः शक्तिः ।
बिन्दूद्गच्छत्त्र्यश्राकारधरा व्यापिका [1]प्रोक्ता ॥ २५ ॥
ऊर्ध्वाधोबिन्दुद्वयसंयुतरेखाऽऽकृतिः समना ।
सैवोर्ध्वबिन्दुहीनोन्मना तदूर्ध्वं महाबिन्दुः ॥ २६ ॥
शक्त्यादीनां तु वपुर्द्वादशरविकान्तिपुञ्जाभम् ।

मध्येफालं फालस्य मध्ये । 'पारे मध्ये षष्ठ्या वा' (२-१-१८) इति समासः । कान्त्या, आकृत्या चान्वर्थः; अर्धचन्द्रवत्कान्तिराकारश्चेत्यर्थः ।

[1] कथिता.

अण्डस्थानीयौ द्वौ बिन्दू सिरास्थानीया मध्यरेखा चेति त्रयं संहत्य नादस्याकारः, 'बिन्दुद्वयान्तरे दण्डः शेवरूपो मणिप्रभः' इति चक्रसंकेतोक्तेः। शेवो मुष्कद्वयमध्यवर्तिनी नाडी, मणिः पद्मराग इति तु सांप्रदायिकी व्याख्या। दण्डस्य शेवरूपत्वविशेषणं घनतादाढर्चयोर्निरासाय, केशतुल्यपिष्टविकारेषु पायसोपयुक्तेषु शेवपदप्रयोगादित्यपि व्याख्या नातीव विरुद्धा। ऊर्ध्वाग्रं दक्षिणारं लाङ्गलम्, वामभागे बिन्दुरेक इति नादान्ताकारः। विसर्जनीयवदूर्ध्वाधो बिन्दुद्वयमिति भ्रमनिरासायाह—तिर्यगिति। वामाद्वामभागस्थबिन्दुमारभ्योर्ध्वं गच्छन्ती निःसरन्ती या सिरा रेखा तदाकारेत्यर्थः। 'शक्तिर्वामस्थबिन्दूद्यत्सिराऽऽकारा' इति चक्रसंकेते। आर्षत्वात्समस्तस्यापि बिन्दुपदस्य पूर्वपदेन सह बहुव्रीह्यवयवत्वेन, उत्तरपदेन सह पञ्चमीतत्पुरुषावयवत्वेनापि काकाक्षिन्यायेनान्वय इति सांप्रदायिकैर्व्याख्यानात्। उद्यत्पदस्य सामान्यवाचकस्यापि बिन्दूद्यदिति विशेषे लक्षणायां वामस्थाद्बिन्दोरुद्यत्याः सिराया आकारो यस्या इत्येव विगृह्य बिन्दोर्वामस्थत्वविशेषणबलादेव दक्षिणदिग्भागे निःसिराक एको बिन्दुरस्तीति गम्यत इति व्याख्यायां वा न कोऽपि क्लेशः। बिन्दुसंस्पृष्टाग्रकत्रिकोणाकारा व्यापिका। 'बिन्दुद्वयान्तरालस्थऋजुरेखामयी पुनः। समना' इति वचने शक्तिवद्बिन्दुद्वयं तिर्यग्रूपं मा भूदित्यतः संप्रदायमनुसरन्नाह—ऊर्ध्वाध इति। संयुताऽग्रमूलभागयोः संश्लिष्टा, न त्वस्पृशन्ती स्थिता। इयं च ब्रह्मरन्ध्रसंस्थाना। इयमेव च मनोन्मनीत्यपि व्यवह्रियते। मनसो यथाऽवस्थितरूपस्यैवाभ्यासविशेषेणैतावत्पर्यन्तवृत्त्युद्गमः सुसाध इत्यतः समनेत्युच्यते। एतदुपरि तु रूपान्तरं प्राप्तस्यैव मनसो धृतिविषयतेत्यत उत्क्रान्तमनस्कत्वादुन्मना। प्रकृतानुपयुक्तमप्युन्मनोपरिस्थानं चक्रराजस्य त्रिविधभावनाऽन्तर्गतनिष्कलभावनायामुपयुक्तत्वेन प्रसङ्गादाह—तदूर्ध्वं महाबिन्दुरिति॥ शक्त्यादीनामिति। समनाऽन्तानां तिसृणामिति संप्रदायः।

'शक्त्यादीनां तिसृणां द्वादशरवितुल्यकान्तयस्तनवः' इति पाठो युक्तः । विन्द्वादिस्वरूपाङ्गविस्तरः स्वच्छन्दसंग्रहे द्रष्टव्यः ॥ -२२—२६- ॥

The Bindu, circular in form, shines forth like a lamp (with its seat) in the middle of the forehead. (-22)

Ardha-candra having its seat just above that, bears a significant name, both in point of brilliance and form (*i.e.*, shines like and assumes the form of the crescent moon). Rodhinī, which is immediately the next, is triangular in shape and has the brightness of moonshine. (23)

Nāda, which resembles the ruby has the appearance of a nerve placed between two eggs (*i.e.*, a vertical line between two zeros). Nādānta has the sheen of lightning and resembles a plough with a Bindu attached to the left. (24)

S'akti resembles a nerve rising out of the left of two juxtaposed Bindu-s. Vyāpikā is said to have the form of a Bindu and a triangle with its apex resting thereon. (25)

Sa-manā has the form of two-Bindu-s placed one above the other, with a line connecting them. The same, shorn of the upper Bindu, is Un-manā. Above this lies Mahā-bindu. (26)

The body of S'akti and the (two) others following, has the cumulated brilliance of twelve suns. (26-)

अथ वर्णानामुच्चारणप्रकारमाह—

इत्येवं वर्णानां स्थानं ज्ञात्वोच्चरेत्प्रयत्नात् ॥ २७ ॥

नादः प्राथमिकस्तु द्वितीयकूटेन साकमुच्चार्यः ।
द्वैतीयीकं नादं तार्तीयेनोच्चरेन्न पृथक् ॥ २८ ॥
बिन्द्वादिनवकयोस्तु प्राक्तनकूटस्थयोरनयोः ।
संमेलनेन शबलं तार्तीयीकं विभावयेत्कूटम् ॥ २९ ॥
बिन्द्वादिकसमनान्तं क्रमेण तार्तीयमुच्चरेन्नादम् ।
उन्मन्यन्तर्लीनं विभावयेदेतदुच्चरणम् ॥ ३० ॥

स्थानं कण्ठाद्युत्पत्तिस्थानं मूलाधारादि स्थितिस्थानं च । यत्नादान्तरबाह्ययत्नपूर्वकम् । इदं च मानसजपातिरिक्तविषयम् । तत्र तत्तत्स्थानयत्नविभावनमात्रस्योपयोग इति द्रष्टव्यम । नादो बिन्द्वादिनवकम् । पूर्वपूर्वकूटस्थनादस्योत्तरोत्तरकूटोच्चारणेनैवोच्चरितप्रायत्वान्न तत्र पार्थक्येन यत्नः कालविलम्बो वा कार्य इत्यर्थः । तृतीयकूटे तूत्तरकूटाभावात्तदुभयमपेक्षितमित्याह—बिन्द्वादिकेति ॥ -२७—३० ॥

Having in this manner ascertained the places of (origin of and seats assumed by) the letters, one should pronounce them with the aid of the efforts (external and internal mentioned above). (-27)

The Nāda of the first Group should be pronounced immediately with the second Group. So also, one should deal with the Nāda of the second Group along with the third Group and not separately. (28)

One should construe the third Group as being variegated by a conglomeration of the nine (letters) beginning with Bindu of the first two Groups. (29)

One should pronounce the Nāda of the third Group beginning from Bindu and ending with Sa-manā

in the order of sequence and construe the same as having merged in Un-manī. This is (the procedure to be adopted for) pronunciation. (30)

पूर्वं विद्यास्वरूपस्य काल उक्तः, इदानीमुच्चारणकालं निष्कृष्याह—

आद्ये दश मध्ये ताः सार्धास्तार्तीयकूटेऽष्टौ ।
एकलवोना ऊनत्रिंशन्मात्रा मनोर्जपे कालः ॥ ३१ ॥

आद्ये कूटे दश मात्राः । मध्ये कामराजकूटे ता दश सार्धा मात्राः । तार्तीयकूटेऽष्टाविति । अस्य पूर्वपरवर्ति पदद्वयं काकाक्षिन्यायेन द्विर्द्विरन्वयितव्यम् । तेनैकलवोनाः सार्धा अष्टौ मात्रास्तृतीयकूटे यथा-पूर्वमवस्थिता इत्यर्थः । संहृत्य त्वाह—एकलवोना इति । ऊनत्रिंशदेकोन-त्रिंशत् । जपे वाचिके । न तु मानसे पूर्वोक्तकालादयः । प्रथमद्वि-तीयकूटस्थास्तु यत्र न्यासादौ संध्याऽङ्गभूतैकैककूटमात्रजपे च प्रातिस्विक-मुच्चारणेन कूटानां विनियोगविधिस्तत्रैव सार्थका इति विज्ञेयम् ॥ ३१ ॥

There are ten (Mātrā-s) in the first Group, the same number in the middle with the addition of a half, and eight with the addition of a half less one Lava in the third Group, making in all twenty-nine (Mātrā-s) minus one Lava, which is the period for the Japa (Pronunciation) of the Mantra. (31)

अथ कूटानां व्यष्टिसमष्टिभेदेन चतुर्धा भिन्नानां स्वरूपविशेषानाह—

व्यष्टिसमष्टिविभेदादस्यां चत्वारि बीजानि ।
सृष्टिस्थितिसंहारानाख्यारूपाणि भावनीयानि ॥ ३२ ॥

पुटधामतत्त्वपीठान्वयलिङ्गमातृतत्समष्टीनाम् ।
रूपान्तराणि बीजान्यमूनि चत्वारि चिन्तनीयानि ॥ ३३ ॥

अनाख्या तिरोधानानुग्रहयोः समष्टिः, कृत्यपञ्चकेष्वप्यौदासीन्यावलम्बनरूपावस्थानविशेषो वा । पुटादिषट्कं धामसप्तकं च त्रित्रिरूपं पृथक्पृथक्, तत्समष्टिरेकैकेत्येवं चत्वारि चत्वारि । यथा---पुटानि ज्ञातृज्ञानज्ञेयानि तत्सामरस्यं च । धामानि चक्रनाथदशाशक्तित्रयात्मरूपाणि सप्त । तत्र चक्राण्यग्निचक्रसूर्यचक्रसोमचक्राणि ब्रह्मचक्रे च । नाथा मित्रेशनाथषष्ठीशनाथोड्डीशनाथाश्चर्यानन्दनाथश्च । दशा जाग्रत्स्वप्नसुषुप्तयस्तुरीया[1] च । शक्तयः---वामाज्येष्ठारौद्र्यः शान्ता च; इच्छाज्ञानक्रिया अम्बिका च; कामेश्वरीवज्रेश्वरीभगमालिन्यो महात्रिपुरसुन्दरी च । आत्मान आत्मान्तरात्मपरमात्मानो ज्ञानात्मा च । तत्त्वान्यात्मतत्त्वविद्यातत्त्वशिवतत्त्वानि सर्वतत्त्वं च । पीठानि कामरूपपूर्णगिरिजालंधराण्योड्याणपीठं च । अन्वयाः प्राग्दक्षिणपश्चिमान्वया उत्तरान्वयश्च । एत एव समयपदेनाम्नायपदेन च कथ्यन्ते । लिङ्गानि स्वयंभूबाणेतराणि परं च । मातृकाः पश्यन्तीमध्यमावैखर्यः परा च । धामपदार्थत्वेनोक्तं शक्तित्रयं मातृपदस्य वाऽर्थः ॥ ३२, ३३ ॥

In this (Vidyā) by treating (the three Groups) severally and conjointly may be construed the four Bīja-s which take the forms of Creation, Preservation, Destruction and An-ākhyā (the nameless one). (32)

These four Bīja-s may similarly be construed as assuming four different forms by being treated severally

[1] ०स्तुर्या.

and conjointly in each of the following cases: Puṭa, Dhāman, Tattva, Pīṭha, Anvaya, Liṅga and Mātṛkā. (33)

अथ प्रत्यक्षरं स्वरूपमाह—

एकैकस्मिन्कर्मणि सृष्ट्यादिविभेदतस्त्रिविधे ।
ब्रह्माद्या अधिपतयो भारत्यादिस्वशक्तिभिः सहिताः ॥ ३४ ॥
ब्रह्मादयस्त्रयोऽमी भारत्याद्याश्च शक्तयस्तिस्रः ।
प्रत्यक्षरस्वरूपाः शाक्तार्थे वक्ष्यमाणया रीत्या ॥ ३५ ॥

सृष्टिकर्म त्रिविधं सृष्टिसृष्टिः सृष्टिस्थितिः सृष्टिसंहृतिश्चेति । एवं स्थितिकर्म स्थितिसृष्टिः स्थितिस्थितिः स्थितिसंहृतिश्चेति । एवं संहृतिकर्मापि संहृतिसृष्टिः संहृतिस्थितिः संहृतिसंहृतिश्चेति । अत्र प्रतित्रिकं [1]ब्रह्मादयस्त्रयो ब्रह्मविष्णुरुद्रा भारतीपृथिवीरुद्राणीसहिता अधिपतयः । एवं च प्रथमकूटे—ककारो ब्रह्मण एव रूपान्तरम्, त्रिकोणा तु भारतीस्वरूपा, तुर्यः स्वरो विष्णुस्वरूपः, लकारः पृथिवीस्वरूपः, हकारो रुद्रस्वरूपः, रेफो रुद्राणीस्वरूपः, तुर्यः स्वरस्तु शान्ताऽम्बिकात्मकमिथुनस्वरूपः । द्वितीयकूटे मध्यमहकारं परित्यज्यावशिष्टाक्षरेष्वेषैव रीतिः । तृतीयकूटे तु द्वितीयकूटस्थपरित्यक्तहकारस्य ब्रह्मस्वरूपत्वाद्भारतीमारभ्यैव सकारेणारम्भः । शक्तिकूटत्वेन शक्तेः प्राधान्येन प्रथमं निर्देशः । तदेतदाह—शाक्तार्थे वक्ष्यमाणयेति ॥ ३४, ३५ ॥

The Trinity consisting of Brahman, etc., with their S'akti-s, Bhāratī, etc., form the presiding Deities

[1] ब्रह्माद्यास्त्रयो.

over the threefold aspects of every action comprised in Creation, etc. (34)

These three Deities, Brahman, etc., and their S'akti-s, Bhāratī, etc., signify the several letters of the Mantra, in the manner to be hereinafter described in the S'āktārtha. (35)

अथावशिष्टानां बिन्द्वादीनां स्वरूपमाह—

हृल्लेखाकामकलासपरार्धकलाऽऽख्यकुण्डलिन्युत्थाः ।
नादाश्चक्रत्रितयत्रितयात्मानो [1]विभावनीयाः स्युः ॥ ३६ ॥

अत्र प्रथमकूटे या हृल्लेखा, तदन्तर्गता या कामकला, तस्यां गुरुमुखैकवेद्या या सपरार्धकला, सा वह्निकुण्डलिनीत्युच्यते । सैव द्वितीयकूटे सूर्यकुण्डलिनीति, तृतीयकूटे सोमकुण्डलिनीति च कथ्यते । बिन्द्वादिसमष्टिरूपो नादस्तु तत एवोत्पन्नो दीपशिखाऽग्रवर्तिकज्जललेखावत् । एवं चानाहतमारभ्योत्थितो नादस्त्रैलोक्यमोहनसर्वाशापरिपूरकसर्वसंक्षोभणचक्रत्रयस्य त्रिविधसृष्टिरूपस्यापरं रूपम्; भ्रूमध्यमारभ्योत्थितो नादः सर्वसौभाग्यदायकसर्वार्थसाधकसर्वरक्षाकरचक्रत्रयस्य त्रिविधस्थितिरूपस्यापरं रूपम्; बिन्दुस्थानमारभ्योत्थितो नादः सर्वरोगहरसर्वसिद्धिप्रदसर्वानन्दमयचक्रत्रयस्य [2]संहृतित्रयरूपस्यापरं रूपमिति विभावनीयाः ॥ ३६ ॥

The Nāda-s which emanate from the (three) Kuṇḍalinī-s which are otherwise known as Sa-parārdha-kalā-s of the Kāma-kalā-s (ई) contained in the Hṛl-

[1] विभाव्याः
[2] संहृतिरूप.

lekhā-s (*Hrīṃ*) (of the three Groups) should be construed *as the three triads of Cakra-s.* (36)

अथावस्थापञ्चकं शून्यषट्कं विषुवत्सप्तकं च जपकाले विभाव्यमाह— इन्द्रियदशकेत्यादिना, एवमवस्थेत्यन्तेन श्लोकषोडशकेन ।

इन्द्रियदशकव्यवहृतिरूपा या जागरावस्था ।
तत्र प्रकाशरूपो हेतुर्भाव्यस्तृतीयगे रेफे ॥ ३७ ॥

कर्मेन्द्रियाणि पञ्च वाक्पाणिपादपायूपस्थानि ; ज्ञानेन्द्रियाण्यपि पञ्च घ्राणरसनचक्षुस्त्वक्श्रोत्राणि ; एतेषां दशानां स्वस्वविषयोत्पादकत्वं व्यवहारः ; स एव जागरावस्था । तत्र हेतुरूपं ज्ञानमरूपत्वाद्भावनादशायां प्रकाशरूपत्वेन तृतीयकूटस्थरेफस्थाने विभावनीयम् ॥ ३७ ॥

In the Repha (*r*) of the third Group should be construed the Brightness which is the cause of the Jāgara (wakeful) state wherein alone the ten Indriya-s (physical and psychic) function. (37)

अन्तःकरणचतुष्कव्यवहारः स्वाप्निकावस्था ।
सा तार्तीयेकाराद्बोध्याऽपि गलस्थले चिन्त्या ॥ ३८ ॥

मनो बुद्धिरहंकारश्चित्तं चेत्यन्तःकरणानि चत्वारि । तैरेव व्यवहारः स्वप्नः । तज्जनकः प्रकाशस्तृतीयहृल्लेखास्थकामकलया[1] बोध्यः । अथापि गलस्थले द्वैतीयीकलकारे चिन्त्यः । गलस्थश्चासौ लश्चेति विग्रहः ॥ ३८ ॥

[1] ०कलाया

In the *ikāra* of the third Group should be construed the Brightness which is the cause of the Svapna (dreaming) state, wherein the four Antaḥ-karaṇa-s prevail; the Lakāra (*La*) of the second Group should likewise be so construed. (38)

आन्तरवृत्तेर्लयतो लीनप्रायस्य जीवस्य ।
वेदनमेव सुषुप्तिश्चिन्त्या तार्तीयबिन्दौ सा ॥ ३९ ॥

विवरणमत आत्मसुखाज्ञानविषयिकास्तिस्रोऽविद्यावृत्तयः स्वीकृता इत्यत आह—आन्तरवृत्तेरिति । अन्तःकरणपरिणामरूपवृत्तेत्यर्थः । वार्त्तिकमते वृत्तिसामान्याभाव एव सुषुप्तिः । तार्तीयबिन्दौ ललाटस्थाने ॥३९॥

In the Bindu of the third Group should be construed the sub-conscious state which is the cause of Su-ṣupti (deep slumber), wherein all the Antaḥ-karaṇa-s are in a dormant condition and the Jīva almost so. (39)

तुर्यावस्था चिदभिव्यञ्जकनादस्य वेदनं प्रोक्तम् ।
तद्भावनाऽर्धचन्द्रादिकं त्रयं व्याप्य कर्तव्या ॥ ४० ॥

अर्धचन्द्ररोधिनीनादेषु व्याप्तस्तुर्यावस्थाप्रकाशो भाव्यः ॥ ४० ॥

The state wherein the Nāda brings about absolute Caitanya is known as the Turyā Avasthā, *i.e.*, the fourth state. This should be construed as prevailing in the three letters beginning with Ardha-candra. (40)

आनन्दैकघनत्वं यद्वाचामपि न गोचरो नृणाम् ।
तुर्यातीताऽवस्था सा नादान्तादिपञ्चके भाव्या ॥ ४१ ॥

Bliss alone (in its entirety) which is beyond the range of description by men is the Turyātīta (beyond the fourth) state, which is to be construed in the five letters beginning with Nādānta. (41)

अवस्थापञ्चकं निरूप्य शून्यषट्कं निरूपयति—

तार्तीयीके रेफस्थाने बिन्दौ च रोधिन्याम् ।
नादान्तव्यापिकयोश्चन्द्रकतुल्यानि पञ्च शून्यानि ॥ ४२ ॥
उन्मन्यां नीरूपं षष्ठं चिन्त्यं महाशून्यम् ।

चन्द्रको मयूरपिच्छाग्रगतं चन्द्राकारं शून्यम् । तदुक्तं स्वच्छन्दसंग्रहे—‘शिखिपक्षचित्ररूपैर्मण्डलैः शून्यपञ्चकम् । ध्यायतोऽनुत्तरे शून्यं परं व्योमतनुर्भवेत् ॥’ इति । यद्यपि ‘अग्न्यादिद्वादशान्तेषु त्रींस्त्रींस्त्यक्त्वा वरानने । शून्यत्रयं विजानीयादेकैकान्तरितं प्रिये । शून्यत्रयात्परे स्थाने महाशून्यं विभावयेत् ॥’ इति पूजासंकेते रेफादिमहाबिन्द्वन्तेषु द्वादशसु स्थानेषु मध्ये त्रयं त्रयं त्यक्त्वा, एकैकमन्तरितं मध्यस्थितं शून्यत्रयं विजानीयादित्यर्थादर्धचन्द्रशक्तिमहाबिन्दुषु शून्यत्रयं तदूर्ध्वे चतुर्थमित्यर्थः स्पष्टः वा, आदावन्ते च त्रयं त्रयं त्यक्त्वा मध्यस्थेऽर्धचन्द्रादिव्यापिकाऽन्तषट्क एकैकव्यवधानेन शून्यत्रयं तत्परे चतुर्थमित्यर्धचन्द्रनादशक्तिषु त्रीणि शून्यानि व्यापिकायां महाशून्यमिति वाऽर्थः स्पष्टं प्रतीयते; तथाऽपि ‘शून्यषट्कं महेशानि अवस्थापञ्चकं पुनः । विषुवत्सप्तरूपं च भावयन्मनसा

जपेत् ॥' इत्युपक्रमविरोधादन्यथाऽर्थः । तथा हि—अमचादीति भिन्नं पदं शून्यत्रयेऽन्वेति । अन्तशब्दश्चरमावयववाची । अर्थाच्चरमहल्लेखा-संबन्धिषु द्वादशस्ववयवेषु हकाराद्युन्मनान्तेषु, अमचादि रेफमारभ्य शून्य-योस्त्रयं शून्यषट्कं विजानीयात् । तच्च न रेफादिसांतत्येन, किं त्वेकैकव्य-वधानेनेति । अत आह—एकैकान्तरितमिति । प्रथमशून्यस्य रेफस्था-नीयत्वे कथिते व्यवधानमर्थाद्धकारेकारार्धचन्द्रनादशक्तिसमनाभिः षड्भिरिति सिध्यति । तदेवाह—त्रींस्त्रीनिति । द्विगुणितांस्त्रींस्त्यक्त्वेत्यर्थः । शून्यत्रयात् शून्ययोस्त्रयस्य, तत्षट्कस्येत्यर्थः । 'सुपां सु—' (७ १-३९) इति सुपो ङस आदादेशः । निर्धारणे षष्ठी । तेषां मध्ये परे चरम उन्मन्यां महाशून्यमिति । एतद्विभावनस्य परमरहस्यत्वादित्थं क्लेशेनोक्तिरित्यन्वयि-तव्यम् ॥ ४२, ४२- ॥

In the Repha, Bindu, Rodhinī, Nādānta and Vyāpikā places of the third Group should be construed five S'ūnya-s (Noughts) of the shape of the crescent in the plumes of the peacock. In Un-manī should be construed a sixth S'ūnya (Nought) which is shapeless and is known as Mahā-s'ūnya. (42, 42-)

क्रमात्प्राप्तानि सप्त विषुवन्त्याह—

प्राणात्ममानसानां संयोगः प्राणविषुवाख्यः ॥ ४३ ॥

ककारात्मकवायुः प्राणः । आत्मा प्राणा मनश्चेत्येतेषामैक्यं प्राण-विषुवसंज्ञमिति केचित् । यथाश्रुतमन्ये ॥ -४३ ॥

The coalescence of Prāṇa, Ātman and Manas is known as Prāṇa-viṣuva. (-43)

मन्त्रविषुवमाह—

प्राथमिककूटनादे त्वनाहताद् ब्रह्मरन्ध्रान्ते ।
व्यष्टिसमष्टिविभेदाद् बीजचतुष्कस्य च स्वस्य ॥ ४४ ॥
ऐक्येन नादमयताविभावनं मन्त्रविषुवाख्यम् ।

प्राथमिककूटनादे बीजचतुष्कस्यैक्यम्, स्वस्यात्मनस्त्वाधारोत्थितनादेन सहैक्यं न प्राथमिकेनानाहतादारब्धेन सह, 'आधारोत्थितनादे तु लीनं बुद्ध्वाऽऽत्मरूपकम् । संयोगेन वियोगेन मन्त्राणां महेश्वरि ॥ अनाहताद्याधारान्तं नादात्मत्वविचिन्तनम् । विषुवम्' इति कादिमतीयवचनात् । संयोगेन समष्ट्या । वियोगेन व्यष्ट्या । चतुर्विधानामिति शेषः । आधाराणामन्तो ब्रह्मरन्ध्रम् । आधारान्तान्तमिति तन्त्रेणान्तपदद्वयसत्त्वाद्ब्रह्मरन्ध्रान्तमित्यर्थकत्वेन व्याचक्षते । आऽऽधारान्तादित्यर्थक आङ्प्रश्लेषे तु सर्वं सुस्थम् ॥ ४४, ४४- ॥

By coalescing the Nāda of the first Group with the four Bīja-s obtained by the treatment (of the three Groups) severally and jointly, as also by the coalescence of one's Ātman with the Nāda (emanating from Mūlādhāra) and construing them to be Nāda (pervading the plexuses beginning) from An-āhata to Brahma-randhra, what is known as Mantra-Viṣuva results. (44, 44-)

नाडीविषुवमाह—

आधारोत्थितनादस्योच्चाराद्ब्रह्मरन्ध्रान्तम् ॥ ४

षट्चक्राणां ग्रन्थीन्द्वादश भिन्दन्सुषुम्णयैव पथा ।
नाडीनादार्णानां संयोगो नाडिकाविषुवम् ॥ ४६ ॥

मूलाधारादिचक्रषट्कस्याप्यध ऊर्ध्वं चैकैको ग्रन्थिरिति द्वादश ग्रन्थयः । तद्भेदनमार्गेणैव सुषुम्णानाडी मूलाधाराद्ब्रह्मरन्ध्रं व्याप्नोति । तेनैव मार्गेण नादस्य वर्णपङ्क्तेश्च नाडीसंयुक्तत्वेन भावनयोच्चारणं नाडीविषुवमित्यर्थः ॥ -४५, ४६ ॥

By extending the Nāda emanating from Mūlādhāra, so as to pierce the twelve Granthi-s (Knots) of the six Cakra-s (plexuses) through the Suṣumṇā Nāḍī, as far as Brahma-randhra, the coalescence of the resultant Nāḍī, Nāda and Arṇa is known as Nāḍikā-viṣuva. (-45, 46)

प्रशान्तविषुवमाह—

रेफे कामकलाऽर्णे हार्दकलायां च बिन्द्वादौ ।
नादान्तावधि नादः सूक्ष्मतरो जायते तत्र ॥ ४७ ॥
शक्तेर्मध्ये तल्लयचिन्तनमुदितं प्रशान्तविषुवाख्यम् ।

तृतीयकूटस्थरेफादिषु सप्तसु स्थानेष्वाधारादारब्धस्य नादस्य तत्र सूक्ष्मतरतादशा, अभिघातादुत्तरोत्तरक्षणेषु कांस्यतालध्वनिवत् । तस्य शक्तौ लयो भाव्य इत्यर्थः ॥ ४७, ४७- ॥

A very subtle Nāda emanates from pronouncing the letters Repha (*r*), Kāma-kalā (*ī*) and those beginning from Bindu and ending with Nādānta of the Hārda-

kalā (*Hrīṃ*). The construing of the merging of this (very subtle Nāda) with S'akti is known as Pras'ānta-viṣuva. (47, 47-)

शक्तिविषुवमाह—

शक्त्यन्तर्गतनादं समनायां भावयेल्लीनम् ॥ ४८ ॥

शक्तिस्थानादूर्ध्वं पुनरुज्जीवितस्य नादस्य सूक्ष्मतमस्य व्यापिकामुल्लङ्घ्य समनायां लयः शक्तिविषुवमित्यर्थः ॥ ४८ ॥

समनोर्ध्वं पुनरुज्जीवितस्यात्यन्तं सूक्ष्मतमस्य नादस्योन्मन्यां लयकालविषुवमित्याह—

समनागतमुन्मन्यामेते द्वे शक्तिकालविषुवाख्ये ।

This Nāda merged with S'akti should again be construed as merged in Sa-manā, which Nāda merged with Sa-manā should likewise be construed as merged in Un-manī. The latter two are respectively styled S'akti-viṣuva and Kāla-viṣuva. (-48, 48-)

तत्त्वविषुवमाह—

श्रीविद्याकूटावयवेषु ककारादिषून्मनान्तेषु ॥ ४९ ॥
अकुलादिकोन्मनाऽन्तप्रदेशसंस्थेषु सकलेषु ।
अध्युष्टनिमेषोत्तरसप्तदशाधिकशतत्रयत्रुटिभिः ॥ ५० ॥
उच्चरिते नादे सति तस्यान्ते तत्त्ववेदनं भवति ।
तदिदं चैतन्याभिव्यक्तिनिदानं तु तत्त्वविषुवाख्यम् ॥५१॥

उक्तेषु द्वात्रिंशत्पद्मेष्वधस्तनद्वयं चरमं चाकुलपद्मानि। शेषाणि कुलपद्मानि। तेषु यद्यपि मूलाधाराख्यात्कुलपद्मादेव विद्याऽक्षराणामारम्भः, तथाऽपि चक्रराजस्य सकलाख्यभावनाया अधस्तनसहस्रदलकमलमारभ्यैव 'अकुले विषुसंज्ञे च' इत्यादिना चतुःशत्यामुक्तत्वात्[1]कुलाकुलविद्ययोरभेदेन श्रीविद्याया अपि तत आरम्भोक्तिस्तन्त्रेषु। अध्युष्टं सार्धत्रयम्। निमेषो लोचनस्पन्दकालः। तस्य त्रिसहस्रतमोऽंशस्त्रुटिः, 'स्वस्थे नरे समासीने यावत्स्पन्दति लोचनम्। तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्तितः। तत्परस्य शतांशस्तु त्रुटिरित्यभिधीयते॥' इति वचनात्। एवं च (१०८१७) अयुतोत्तराष्टशतोत्तरसप्तदशत्रुटिपर्यन्तं विद्याऽवयवस्थानसंलग्नतापूर्वकं नादोच्चारणे कृते सति, तत्त्वस्य स्वसंविदभेदस्य बोधो भवति। तदिदमुच्चारणं तत्त्वविषुवम्॥ -४९—५१॥

When Nāda is pronounced, permeating all the parts of the S'rī-vidyā-kūṭa-s beginning from *Kakāra* and ending with Un-manā and having from A-kula-to Un-manā for their seats, taking up in all three hundred and seventeen Truṭi-s over and above three and a half Nimeṣa-s, Tattva-jñāna is attained at the close. This is the prime factor in the realization of Caitanya and is known as Tattva-viṣuva. (-49—51)

उपसंहारपूर्वकं जपं लक्षयति—

एवमवस्थाशून्यविषुवन्ति चक्राणि पञ्च षट् सप्त।
नव च मनोरर्थांश्च स्मरतोऽर्णोच्चारणं तु जपः॥ ५२॥

[1] चक्रविद्ययो.

अवस्थाऽऽदिचतुष्टये संख्याचतुष्टयस्य क्रमादन्वयः। नादत्रयस्य चक्रत्रयात्मकत्वभावनं प्रागुक्तम्। चक्रसंकेते त्वन्यदपि त्रयमुक्तम्—चक्रभावनं त्रिविधं सकलं निष्फलं सकलनिष्कलं चेति। अकुलसहस्रार मूलाधारादिपञ्चकं सूक्ष्मजिह्वा भ्रूमध्यं बिन्दुस्थानं चेति नवसु स्थानेषु त्रैलोक्यमोहनादिचक्रनवकभावनं सकलम्, बिन्द्वाद्युन्मन्यन्तं तद्भावनं द्वितीयम्, महाबिन्दावेव तद्भावनं तृतीयमिति। मनोर्मन्त्रस्यार्थाननुसंदधानस्य विद्याया अर्णानामक्षराणामष्टपञ्चाशतो मध्य आद्यकूटद्वितयबिन्द्वादिनवकद्वयप्रहाणेनावशिष्टानां चत्वारिंशतोऽक्षराणामुच्चारणं जपो जपपदवाच्यमित्यर्थः ॥ ५२ ॥

Pronouncing the letters fully cognizing the Avasthā-s (states), S'ūnya-s (Noughts), Viṣuvat-s (Coalescences) and Cakra-s (Plexuses) which are respectively five, six, seven and nine in number and also with the knowledge of the true import of the Mantra-s, constitutes (what is known as) Japa. (52)

भास्कररायेण गुरोः करुणावशतः समुन्मिषिते।
वरिवस्यातिरहस्ये पूर्वांशः पूर्णतामगमत्[1] ॥ ५३ ॥

Thus comes to a close the first part of Varivasyārahasya brought to light by Bhāskara-rāya with the grace of his Guru. (53)

इति श्रीनृसिंहानन्दनाथचरणाराधकेन भास्कररायापरनाम्ना भासुरानन्दनाथेनोन्नीते वरिवस्यारहस्ये तत्प्रकाशे च प्रथमोंशः।

[1] पूर्णतामापत्.

द्वितीयोंशः ।

जपलक्षणशरीरघटकत्वेन 'यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥' इत्यर्थज्ञानरहितशब्दोच्चारणस्य निन्दया पापानुमानाच्चार्थज्ञानमावश्यिकमित्याह—

नार्थज्ञानविहीनं शब्दस्योच्चारणं फलति ।
भस्मनि वह्निविहीने न प्रक्षिप्तं हविर्ज्वलति ॥ ५४ ॥
अर्थमज्ञानानानां नानाविधशब्दमात्रपाठवताम् ।
उपमेयश्चक्रीवान्मलयजभारस्य वोढैव ॥ ५५ ॥

[1]चक्रीवान् गर्दभः । यद्यपि 'यथा खरश्चन्दनभारवाही' इति श्रुतौ खरस्यैवोपमानता, तथाऽपि सादृश्यनिरूपकगुणाधिक्यवत एवोपमानत्वात्तदाधिक्यव्यञ्जनाय प्रतीपालंकार इवोपमानोपमेययोर्व्यत्यासः ॥ ५४, ५५ ॥

Pronunciation without a knowledge of the true import bears little fruit, (even as) the offering thrown over ashes without fire does not burst into flame. (54)

To those who are merely conversant with the recital of the different sounds without a knowledge of

[1] चक्रीवान् रासभः

their meaning may be compared the donkey with a *load of sandalwood (grown in the Malaya mountains)* on its back. (55)

पुरुषार्थानिच्छद्भिः पुरुषैरर्थाः परिज्ञेयाः ।
अर्थानादरभाजां [1]नैवार्थः प्रत्युतानर्थः ॥ ५६ ॥

एतेनार्थज्ञानस्य नित्यत्वमुक्तं भवति ॥ ५६ ॥

By those men who are in quest of the Puruṣārtha-s (the goals of human desires) should be comprehended the meanings (of the Mantra). To those who ignore the meanings there is no Artha (the attainment of their desire); on the other hand (such ignoring leads to) ruin. (56)

ते चार्थास्तन्त्रोपनिषद्ग्रन्थभेदेन नानाविधाः शिवेनोक्ताः । तांश्च संजिघृक्षुरुद्दिशति—

अथातः पूर्णगायत्र्याः प्रतिपाद्योऽर्थ आदिमः ।
भावार्थः संप्रदायार्थो निगर्भार्थस्तुरीयकः ॥ ५७ ॥
कौलिकार्थो रहस्यार्थो महातत्त्वार्थ एव च ।
नामार्थः शब्दरूपार्थश्चार्थो नामैकदेशगः ॥ ५८ ॥
शाक्तार्थः सामरस्यार्थः समस्तसगुणार्थकौ ।
महावाक्यार्थ इत्यर्थाः पञ्चदश्याः स्वसंमिताः ॥ ५९ ॥

[1] नैवार्थाः प्रत्युतानर्थाः

[1]अथानन्तरम्, अत उक्तरीत्याऽर्थज्ञानस्यावश्यिकत्वात्, अर्थाः कथ्यन्त इति शेषः। पूर्णगायत्र्याश्चतुर्थचरणसहितायाः। स्व आत्मीया वर्णाः, तैः संमिताः, तत्संख्यासमानसंख्याकाः। पञ्चदशेति यावत्। अथ वा, संप्रदायार्थप्रकरणे कादिविद्यायां सप्तत्रिंशद्वर्णाः स्फुटीकरिष्यन्ते, तत्संमिता अर्था इत्यर्थः ॥ ५७—५९ ॥

For these reasons, henceforward are to be dealt with, firstly the true significance of the Pūrṇa-Gāyat-trī, (then) Bhāvārtha, Sampradāyārtha, fourthly Nigarbhārtha, Kaulikārtha, Rahasyārtha, Mahā-tattvārtha, Nāmārtha, S'abda-rūpārtha, Nāmaika-des'ārtha, S'āktārtha, Sāma-rasyārtha, Samastārtha, Sa-guṇārtha and Mahā-vākyārtha, to wit, as many Artha-s as there are letters in the Pañca-das'ī Mantra. (57-59)

त्रिपुरोपनिषदि प्रतिपादितं गायत्र्यर्थमाह—

कामयते स ककारः कामो ब्रह्मैव तत्पदस्यार्थः।
सवितुर्वरेण्यमिति वै सवितुः श्रेष्ठं द्वितीयवर्णार्थः ॥ ६० ॥
सर्वान्तर्यामि दधद्भर्गो देवस्य धीति तुर्यार्थः।
पृथ्वी मही लकारस्तृतीयतुर्याङ्घ्रिबोधिका माया ॥ ६१ ॥

'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति स्मृतेः, 'तदिति ब्रह्म शाश्वतम्' इति श्रुतेश्च तत्पदार्थो ब्रह्म। तदेव च ककारार्थः, 'कं ब्रह्म' इति श्रुतेः। कामयत इत्यर्थो वा। कमेरौणादिको डः।

[1] अथेत्यनन्तरम्.

'कामयते कामी' जायते स एव निरञ्जनोऽकामत्वेनोज्जृम्भते . . . कामोऽभिधीयते, तत्परिभाषया कामः ककारं व्याप्नोति' इति श्रुतेः। कामेश्वर इति तु पर्यवसितम्। सवितुरिति तुप्रत्ययान्तम् 'पुरा वत्सानामपाकर्तोः' इत्यादिकल्पसूत्रीयप्रयोगवत्। प्राणिप्रसवकारणम्। योनिरिति यावत्। तच्च नान्यसाधारणमित्यतो वरेण्यमिति श्रेष्ठं भजनीयमित्यर्थः। तेन पदद्वयेनापि जगद्योनित्वं लब्धम्। तेन च कामेश्वरीत्यर्थः। स एव चार्थ एकारस्य, तस्य त्रिकोणत्वात्। तथा च श्रुतिः—'सवितुर्वरेण्यमिति षूञ् प्राणिप्रसवे, सविता प्राणिनः सूते इत्युपक्रम्य 'त्रिकोणा शक्तिरेकारेण महाभगेन प्रसूते तस्मादेकार एव गृह्यते' इत्यादि। 'यदेकादशमाधारं बीजं कोणत्रयात्मकम्। ब्रह्माण्डादि कटाहान्तं जगदद्यापि दृश्यते' इति वामकेश्वरतन्त्रे स्पष्टं दृश्यते[1]। सर्वेति। सर्वान्तर्यामित्वं देवपदस्यार्थः, 'देवो मध्यवर्ती' इति श्रुतेः। सोऽर्हस्। धत्त इति धीः। दधत्। जगदाधार इत्यर्थः, 'धरो धीत्येवं धार्यते' इति श्रुतेः। भर्ग इति स्पष्टार्थः। सर्वान्तर्यामी सर्वाधारः शिव इति पर्यवसितम्। ईकारस्याप्येतावानर्थः। 'भर्गो देवस्य' इत्याद्युपक्रम्य तुरीयमक्षरं सर्वान्तर्भूतम्। तुरीयाक्षरं पदानां मध्यवर्तित्वेन व्याख्यातम्, 'तस्माद्भर्गो देवस्य धीत्येवमीकारः' इति श्रुतेः। तुर्यार्थः, मन्त्रे तु तृतीयस्यापि मातृकाक्रमे तुरीयत्वादीकारस्यार्थ इत्यर्थः। मही पृथ्वी महत्त्वात्काठिन्याच्च। पञ्चमहाभूतानामुपलक्षणमेतत्। 'मृद्घटः' इतिवदेकविभक्तिमत्त्वरूपसामानाधिकरण्यस्य तदात्मना परिणतत्वमर्थः। अयमेव च पृथिवीबीजस्य लकारस्यार्थः, महीत्यस्य व्याख्यानमुपक्रम्य 'ससागरं सपर्वतम्' इत्यादिना भूमण्डलं प्रतिपाद्य 'भूमण्डलमेवोक्तं लकारेण' इति श्रुतेः। तृतीयेति।

[1] इति स्मृतेश्च।

गायत्र्यास्तृतीयोऽङ्घ्रिः 'धियो यो नः प्रचोदयात्' इति । अस्मदादीनां धियो ध्यानादिरहिते वस्तुनि निष्प्रपञ्चे विषये प्रेरयतीत्यर्थः । परतत्त्व-विषयकज्ञानजनक इति यावत् । तुरीयाङ्घ्रिः 'परोरजसे सावदोम्' इति । रजसः परं परोरजसे । सोः शे इत्यादेशः । रजोऽतीतम् । निर्मलमिति निर्गुणमिति वाऽर्थः, रजःशब्दस्य धूलीवाचकत्ववद् गुणत्रयोपलक्षकत्व-संभवात् । त्रिगुणातीतमिति यावत् । न पुनः पर इत्यत्र भिन्नपदत्वभ्रमः कार्यः, सुब्रह्मण्यानिगदे 'परोरजास्ते पञ्चमः पादः' इति प्रयोगात् । सावदोमित्यस्य सवदोऽवदश्च यः प्रणवः । वक्तुं शक्यो वक्तुमशक्यश्चेत्यर्थः । शब्दैः शक्तिमर्यादया न बोध्यः, शक्यताऽवच्छेदकधर्ममात्रस्य परतत्त्वे विरहात् । लक्षणया तु बोध्यः, सत्यज्ञानादिपदशक्यविशिष्टतादात्म्य-संबन्धशालित्वात् । 'यतो वाचो निवर्तन्ते' इति श्रुतेः, 'वेदैश्च सर्वैरहमेव वेद्यः,' 'लक्ष्यार्था लक्षणागम्या' इत्यादिस्मृतेश्च । प्रणवार्थः परतत्त्वम-कारोकारमकारैर्ब्रह्मविष्णुरुद्रात्मकम् । एतावानप्यर्थो हृल्लेखायाः । हृकारस्य हृदयमर्थः । तत्र ई गतेत्यर्थः । 'इटकिटकटी गतौ' इत्यत्र हृश्लिष्टोऽयं धातुः । अत एव 'हृदयागारवासिनी हृल्लेखा' इति श्रुतिः । एवं चायमर्थो गायत्र्याः प्रथमकूटस्य च संपन्नः—सर्वजगत्सिसृक्षारूप-कामनावान्कामेश्वरः, जगत्कारणरूपा कामेश्वरी, शिवः सर्वान्तर्यामी सर्वा-धारः पञ्चमहाभूताद्यात्मना परिणतः परवस्तुमात्रविषयैकनिर्विकल्पकज्ञानजनको निरञ्जनो निर्गुणो वेदैर्लक्षणया गम्यः शक्त्या त्वगम्यो ब्रह्मविष्णुरुद्रात्मा परतत्त्वमिति ॥ ६०, ६१ ॥

Kakāra (*Ka*) signifies Kāmes'vara, *i.e.*, He who desires; in virtue of which it stands for *Brahman*; which again conveys the significance of the word 'Tat' (in the Gāyat-trī). The second letter (*E*) signifies

'*Savitur vareṇyam*' which stands for the worthy genital Deity, Kāmes'varī. (The third letter of the Mantra *which forms)* the fourth letter of the Alphabet *(Ī)* stands for 'Bhargo devasya dhī' which means S'iva who is immanent and all-sustaining. Lakāra *(La)* signifies Mahī (the earth). Māyā *(Hrīṃ)* signifies the third and fourth feet of the Gāyat-trī. (60, 61)

द्वितीयतृतीयकूटयोरर्थमाह—

त्रिपदी त्रिवर्णबोध्या तुर्यस्तदुपरिषडक्षरीगमकः ।
अथ तार्तीये वर्णद्वितयं त्रिपदीषडक्षरीगमकम् ॥ ६२ ॥
कूटद्वितये शेषं पूर्ववदुन्नेयमिति तु विद्यायाः ।
गायत्र्यर्थस्त्रिपुरोपनिषदि कथितस्तथैव भागवते ॥ ६३ ॥

त्रिपदी गायत्रीस्थं पदत्रयं विद्याद्वितीयकूटस्थवर्णत्रयेण बोध्यम् । त्र्यवयवका वर्णास्त्रिवर्णाः । 'त्रिगुणसचिवः,' 'नवरसरुचिराम्,' इत्यादिवत्समासः । तत्पदार्थो ब्रह्मशिववाचिहकारस्यार्थः, 'तदिति परमात्मा' इत्यारभ्य 'हकाराक्षरं शिवरूपम्' इत्याद्युक्त्वाऽन्ते तत्पदव्यावृत्तिमादाय 'शक्तिं दर्शयति' इति श्रुतेः । सकारस्य सविताऽर्थः । ककारस्य वरेण्यमर्थः । तुर्यो हकारस्तदुपरि पदत्रयोपरि विद्यमाना या षडक्षरी 'भर्गो देवस्य धी' इति तदर्थबोधकः । तृतीयकूटे वर्णद्वितयं सकेति । ताभ्यां धीत्यन्तगायत्र्या अर्थः प्रतिपाद्यः । उभयत्रापि लकारहृल्लेखाभ्यां पञ्चमहाभूताद्यात्मनेत्यादिरर्थ इत्याह—कूटद्वितय इति । एवं चतुश्चरणाया गायत्र्यास्त्रिरावृत्ताया अर्थस्य प्रतिपादकं कूटत्रितयमिति । भागवत इति । भगवत्या इदं भागवतम्, तत्र भगवतीपुराण इत्यर्थः । तस्य हि पुराण-

स्यादिमः श्लोकस्त्रिचरणः पठ्यते । यथा—"सर्वचैतन्यरूपां तामाद्यां विद्यां च धीमहि । बुद्धिं या नः प्रचोदयात्" इति । अत्र ह्याद्यायाः श्रीविद्याया एव ब्रह्मरूपत्वं गायत्र्यादिप्रतिपाद्यत्वं विद्याप्रतिपाद्यत्वादिकं च तदर्थव्याख्यानदर्शिनां स्पष्टम् । वस्तुतस्तु 'हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा । गायत्र्या च समारम्भस्तद्वै भागवतं विदुः ॥' इति लक्षणानुगत्येदमेव भागवतपदवाच्यम्, न पुनः 'जन्माद्यस्य यतोऽन्वयात्' इत्यादिकम् ॥ ६२, ६३ ॥

By the three letters (*Ha Sa Ka* of the second Group) are indicated the (first) three words [Tat savitur vareṇyam] (of the Gāyat-trī). The fourth letter (*Ha*) indicates the next six letters (Bhargo devasya dhī). Then again, the first two letters of the third Group (*Sa Ka*) indicate the same three words and six letters. (62)

The remaining letters of these two Groups (the second and the third) are to be construed as aforesaid. In this manner has been expounded *the meaning of the Gāyat-trī of the Vidyā*, in the Tri-puropaniṣad and the (Devī-) Bhāga-vata. (63)

अथ योगिनीहृदये कथितान्भावार्थादीन्षडर्थानाह—

वामेच्छे ब्रह्मभारत्यौ ज्येष्ठाज्ञाने हरिक्षिती ।
रौद्रीक्रिये शिवापर्णे इत्येतन्मिथुनत्रयम् ॥ ६४ ॥
त्रिभिः कूटैः क्रमाद्वाच्यमीकारत्रितयेन तु ।
एतत्त्रयसमष्ट्यात्म वाच्यं शान्ताऽम्बिकाऽऽत्मकम् ॥ ६५ ॥

प्रकाशस्यांशभूता वामाज्येष्ठारौद्र्यः शक्तयस्तिस्रो ब्रह्मविष्णुरुद्राः पुंरूपाः । तत्समष्टिः शान्ताऽऽत्मिका शक्तिस्तुरीया । विमर्शस्यांशभूता इच्छाज्ञानाक्रियाः शक्तयस्तिस्रस्तद्भार्यात्वेन प्रसिद्धा भारतीपृथिवीरुद्राण्यः स्त्रीरूपाः । तत्समष्टिरम्बिकाऽऽत्मिका शक्तिस्तुरीया । अत्र च प्रथममिथुन-त्रयमीकारविनिर्मुक्तकूटत्रयस्य क्रमेणार्थः । ईकाराणां तु तुरीयमिथुनमर्थः । वक्ष्यमाणे शाक्तार्थे त्वेकैकस्मिन्नपि कूटे रेफान्तवर्णषट्कस्यापि मिथुनत्रयमर्थ इति तस्माद्भेदः । तदुक्तं योगिनीहृदये—'अक्षरार्थो हि भावार्थः केवलः परमेश्वरि । योगिनीभिस्तथा वीरैर्वीरेन्द्रैः सर्वदा प्रिये । शिवशक्तिसमा-योगाज्जनितो मन्त्रराजकः ॥' इति । व्याख्यातं चेदममृतानन्दयोगिभिः—'भारत्यादिभिर्योगिनीभिर्ब्रह्मादिभिर्वीरेन्द्रैः कूटत्रयवाच्यभूतैः शिवशक्ति-समष्टिरूपमिथुनेनेकारवाच्यभूतेन चोपलक्षितो मन्त्रराजो वीरैर्जनितो भावित इत्यर्थः' इति । वस्तुतस्तु, सकलादिनामकास्त्रिविधा उपासका वक्ष्यमाणा वीरपदेनोच्यन्ते, 'अहमि प्रलयं कुर्वन्निदमः प्रतियोगिनः । पराक्रमपरो भुङ्क्ते स्वात्मानमशिवापहम् ॥' इत्यादिना परापञ्चाशिकायामन्यत्र च वीरपदस्य साधकपरत्वेनैव निर्वचनात् । अत एव ब्रह्मादीनामुपासकश्रेष्ठ-त्वाद्वीरेन्द्रपदवाच्यत्वं संगच्छते । एवं च सति तिस्रो भारत्याद्या योगिन्यस्त्रयः सकलाद्याः साधकास्त्रयो ब्रह्माद्या वीरेन्द्राः कूटत्रयेण हृल्लेखाविनिर्मुक्तेन क्रमात्प्रतिपाद्याः । हृल्लेखानां तु शिवशक्तिसामरस्यात्मकं चतुर्थं मिथुनमर्थः, 'ह्रींकार उभयात्मकः' इति वचनात् । वाच्यभूतैर्योगिन्यादिभिर्जनितो युक्तो मन्त्र इत्यर्थः ॥ ६४, ६५ ॥

Brahman and Bhāratī identical with Vāmā and Icchā, Hari and Kṣiti identical with Jyeṣṭhā and Jñānā, S'iva and Aparṇā identical with Raudrī and Kriyā, these three pairs are respectively indicated by the

three Groups, while the aggregates of the three male elements and of the three female elements therein respectively, known as S'āntā and Ambikā, are indicated by three *īkāra*-s. (64, 65)

एतमेवार्थं मनसि निधायाह—

यद्वा गीःसकलब्रह्मप्रभृतीनां त्रयम् ।
त्रिकूटवाच्यं मायायास्तुरीयं मिथुनं मतम् ॥ ६६ ॥

अथ वा, वीरपदं योगिनीनामेव विशेषणमतल्लिङ्गम् । अत एव ब्रह्मादीनां वीरपतिवाचकवीरेन्द्रपदेन निर्देशः । योगिनीवीरेन्द्रपदाभ्यां च शाक्तार्थे वक्ष्यमाणानां षण्णामक्षराणां ब्रह्मभारत्यादिवाचकानां परामर्शः । शिवशक्तिसमायोगपदेन कामकलायाः परामर्शः, तस्यामुभययोगस्यानुपदं वक्ष्यमाणत्वात् । एवं सप्तभिरक्षरैस्त्रिरावृत्तैर्मन्त्रराजो जनितः प्रादुर्भूत इत्यर्थः । एतत्सप्तकपरिणामत्वान्मन्त्रोऽपि तदात्मकः प्रसारपरमार्थन्यायादिति भावः । न च मन्त्रस्योत्पत्त्यङ्गीकारेऽनादित्वभङ्गः, निर्विशेषब्रह्मातिरिक्तस्य निखिलस्यापि सृष्टिप्रतिपादकशास्त्रप्रामाण्याज्जन्यत्वस्येष्टत्वेन सविशेषशक्तिवदजन्यत्वरूपानादित्वस्यानभिमतत्वात् । प्रवाहानादित्वं तु जन्यत्वाङ्गीकारेऽपि नानुपपन्नम्, कार्यमात्रस्य स्थूलसूक्ष्मरूपद्वयस्वीकारेणोत्पत्तेः पूर्वमपि कारणान्तः सूक्ष्मरूपेणावस्थानस्य सत्कार्यवादिभिरस्माभिरङ्गीकारेणानादित्वप्रतिपादकवचनानां तत्परत्वेनाप्युपपत्तेः । प्रथमपक्षद्वये तु जनितपदादेरर्थो न स्वरसः । अत एवोत्तरग्रन्थे भारत्यादिसप्तकसमष्टिरूपायाः परदेवताया मन्त्राभेदप्रतिपादनं संगच्छते, वाचकाक्षरसमष्ट्यात्मकमन्त्रस्य वाच्यार्थसमष्ट्यात्मकपरदेवताऽभेदस्य वाच्यवाचकयोर-

भेदवादिनामस्माकं न्यायसिद्धत्वेन संदर्भशुद्धेः। यथा—'तन्मयीं परमानन्दनन्दितां स्पन्दरूपिणीम्। निसर्गसुन्दरीं देवीं ज्ञात्वा स्वैरमुपासते। शिवशक्त्यात्मसंघट्टरूपे ब्रह्मणि शाश्वते। तत्प्रथाप्रसराश्लेषशालिन्यैन्द्रोपलक्षिते। ज्ञातुर्ज्ञानमयाकारकरणान्मन्त्ररूपिणीम्। तेषां समष्टिरूपेण परा शक्तिस्तु मातृका।' इति। तन्मयीं मन्त्रराजाभिन्नाम्। 'आनन्दमयः,' 'चिन्मयः' इतिवदभेदे मयट्। अन्ये तु 'तुरीयकूटस्यार्थमाह—तन्मयीमिति। चतुर्मिथुनवाचकत्रिबीजसमष्टिरूपमन्त्रवाच्यामित्यर्थः' इति व्याचक्षते। तन्नातीव संदर्भशुद्धं वाच्यार्थे मयडभावश्चेत्युपेक्ष्यम्। स्पन्दः षट्त्रिंशत्तत्त्वात्मना परिणामः, तद्रूपिणीं तदभिन्नाम्। एतेन देवताऽभिन्नविश्वस्यापि मन्त्राभेदः सूचितः। अव्याकृतनामरूपप्रपञ्चस्योत्पत्त्युन्मुखतैव स्पन्दोन्मेषव्याकरणादिशब्दैर्व्यवह्रियते 'नास्ति किंचन मिषत्,' 'नामरूपे व्याकरवाणि,' 'न खलु कुशलः स्पन्दितुमपि' इत्यादौ। तेनाव्याकृतनामरूपजगत एव स्पन्द इति प्रायेण तन्त्रेषु व्यवहारः। इत्थं मन्त्रदेवताजगतामभेदमनुसंदधानो मन्त्रं जपेदिति विधत्ते—स्वैरमुपासत इति। पञ्चमोऽयं लकारो लिङर्थे। 'मुखं व्यादाय स्वपिति' इतिवत्समानकालिकत्वेऽपि 'ज्ञात्वा' इत्यत्र क्त्वाप्रत्ययः। एवं देवतां मन्त्राभेदं युक्तिभिः प्रतिपाद्य मन्त्रपदस्यावयवशक्तिरपि समस्तीति प्रदर्शयति—शिवेत्यादिसार्धश्लोकेन। शिवशक्त्यात्मनोः संघट्टः सामरस्यं तद्रूपे। शाश्वतेऽनादिनिधने। तस्य प्रथायाः पृथुत्वेन प्रसरो जगद्रूपः, तदाश्लेषशालिन्यप्यैन्द्रेण जगदैश्वर्येण काकेनेवोपलक्षिते, न तु विशिष्टे। विषयत्वं सप्तम्यर्थः। तथा च सत्यत्वज्ञानत्वाद्युपलक्षितशुद्धब्रह्मैकविषयकनिर्विकल्पकज्ञानवतः साधकपुंगवस्य ज्ञानमयः स्वसंविद्रूपो ब्रह्मभावो य आकारस्तत्करणान्मन्तारमुक्तज्ञानरूपमननशालिनं त्रायते भयजनकद्वितीयपदार्थमात्रनिरासादिति मन्त्रपदावयवार्थः। तद्रूपिणीमिति विध्यन्तर्गतदेवीपदस्य विशेषणम्। मन्त्र इति

पदस्य देव्यामनुगतिमुपपाद्य तत्पदार्थभूतं पञ्चदश्यभिन्नत्वं संमुग्धाकारेण प्रतिज्ञातपूर्वमपि हेतुना द्रढयति—तेषामिति। तुशब्दोऽत्र हेत्वर्थकः। यतो भारत्यादीनां समष्टिरूपेणोपलक्षिता माता, ततस्तस्यां तद्वाचकाक्षर-समष्ट्यात्मकविद्याऽभेद उपपद्यत इति भावः। अथ वा, मन्त्रपदस्यावयव-शक्त्या प्रवृत्तिमुपपाद्य समुदायशक्त्याऽपि तामुपपादयितुं मन्त्रराजपद-शक्यताऽवच्छेदकं भारत्यादिसप्तकसमष्टित्वं (?) परदेवतायामाह—तेषा-मिति। समष्टीति भावप्रधानो निर्देशः। समष्टित्वेन शक्यताऽवच्छेदकरूपेण युक्ता यतः परदेवता, ततो रूढ्याऽपि मन्त्रराजपदवाच्यत्वं युक्तम्। तेन च तयोरभेदोऽपि युज्यत इति भावः॥ ६६॥

The three triads Bhāratī and others, Sakala and others, and Brahman and others may also be taken to indicate the three Groups shorn of Māyā (*Hrīṃ*) which (latter) indicates the (concordant) fourth pair (of S'iva and S'akti). (66)

अमुमेवार्थं सुनिष्कृष्टं श्लोकतो निबध्नाति—

वामेच्छाऽऽद्याः षडीकार इति सप्तभिरक्षरैः।
त्रिरावृत्तैरियं विद्या संजाता तेन तन्मयी॥ ६७॥
वामाऽऽदिसप्तशक्तीनां समष्टिः परदेवता।
षट्त्रिंशत्तत्त्वरूपाऽस्मान्मात्रयाऽपि न भिद्यते॥ ६८॥

अस्मात्तन्मन्त्रात, मात्रयाऽपि लेशेनापि न भिद्यते। मन्त्रे तृतीयवर्णस्य ज्येष्ठाशक्तिवाचकत्वेन वामाऽऽदिषट्कान्तःपातित्वेनावशिष्टानां

हृल्लेखास्थानामेव कामकलानामीकारपदेन परामर्शान्न त्रिरावृत्तैरिति संख्याविरोधः। न च शाक्तार्थेन पौनरुक्त्यम्, तत्र वामाऽऽदिषट्कं कामकलाया अभिन्नमिति वाक्यार्थः, अत्र तु वामाऽऽदिकामकलाऽन्तसप्तकाभिन्नो मन्त्रः षट्त्रिंशत्तत्त्वाभिन्नमात्रभिन्न इत्यर्थ इति महतो भेदात्। अथ वा, शिवशक्तिसमायोगरूपसमष्टिजन्यत्वान्मन्त्रराजः स्पन्दश्च तद्व्यष्टिरूपौ शिवशक्तिमयौ। तेन जगन्मन्त्रदेवीनामभेद इति भावनं भावार्थः। अत एवोपसंहृतं योगीनीहृदये—'चलत्तासंस्थितस्य तु। धर्माधर्मस्य वाच्यस्य विषामृतमयस्य च। वाचकाक्षरसंयुक्तेः कथिता विश्वरूपिणी। तेषां समष्टिरूपेण पराशक्तिं तु मातृकाम्। कूटत्रयात्मिकां देवीं समष्टिव्यष्टिरूपिणीम्। आद्यां शक्तिं भावयन्तो भावार्थ इति मन्वते।' इति। पराऽऽहंतेत्यादिभावार्थकत्वतलादिवाच्यत्वाद्धर्मः शक्तिः। निर्धर्मकत्वादधर्मः शिवः। स्पन्दजननं प्रति शक्तिबहिर्भूतस्य शिवस्याक्षमत्वादन्वयव्यतिरेकयोराचार्यभगवत्पादैः सौन्दर्यलहर्यां प्रथमश्लोके तथैव तद्व्याख्यानकर्तृभिश्च प्रदर्शितत्वाच्च शक्तेः कारणताऽवच्छेदकत्वं कारणत्वं भवचक्रात्मकस्पन्दं प्रति स्वीकार्यम्। तेन जननमरणादिक्लेशमयसंसारजनकत्वाद्विषं शक्तिः। तद्विनिर्मोकादमृतं शिवः। तदुभयस्य वाच्यस्य वाचके ये अक्षरे वक्ष्यमाणरीत्या हकाराकाररूपे, ताभ्यां व्यस्ताभ्यां तदुभयसमावेशरूपकामकलाऽक्षरेण चास्य चलत्तासंस्थितस्य नश्वरतायुक्तस्य जगतः, प्रकृतत्वान्मन्त्रराजस्य च सम्यक्परिणामपरिणामिभावेन युक्तेः संबन्धादेषां[1] विद्या विश्वरूपिणी कथिता, एकाकारेणोत्पन्नयोरभेदादिति[2] शिवशक्तिसामरस्यरूपस्य पराशक्तिजगदम्बाऽऽदिपदवाच्यस्य कारणस्य कार्याभ्यां विश्वविद्याभ्यामभेदं सूचयं-

[1] ०देषा.

[2] ०रभेदस्यावश्यकत्वादिति.

त्रयाणामभेदमुपसंहरति तेषामित्यादिनेति तदर्थः । अस्मिन्पक्षे योगिन्यादिभिर्भावित इति शेषपूरणेनोपक्रमश्लोकार्थो वर्णनीयः । भावार्थस्वरूपं तु शिवशक्तिसमायोगजन्यत्वादिकमात्रम् , न पुनर्योगिन्यादेर्जनककोटौ निवेशः । अक्षरार्थत्वं च तादृशाक्षरद्वयजन्यत्वादेवेति दिक् । अत्रेदमवधेयम्— इयं सृष्टिः परब्रह्मपरिणाम इति पूर्वमुक्तम्, सा च *सृष्टिर्द्वेधाऽर्थमयी* शब्दमयी चेति । चक्रमयी देहमयी चेति सृष्टिद्वयं तु बालक्रीडनकार्थे स्थूलगृहसमानाकारत्वेन सूक्ष्मगृहनिर्माणतुल्यमर्थसृष्टावेवान्तर्गतम् , न पुनरत्यन्तं भिद्यते । सा च द्विविधाऽपि सृष्टिः समकालीनोत्पत्तिका समकालीनाभिवृद्धिशालिनी च, यथा बीजादङ्कुरतच्छाये । तत्र च च्छायादर्शनेन वृक्षानुमितिरनुभवसिद्धा । सा च च्छायायां वृक्षसमानाकारत्वं वृक्षाविनाभावं च विनाऽनुपपन्नेति तद्द्वयमपि तत्र कल्प्यम् । प्रत्यक्षसंवादविषयश्च तद्वच्छब्दः सर्वोऽप्यर्थाविनाभूतः, अर्थज्ञानजनकज्ञानविषयत्वात 'वागर्थाविव संपृक्तौ' इत्याद्यभियुक्तोक्तेश्च । तथाऽर्थसमानाकारोऽपि । तथा हि—यावन्तः शब्देऽवयवास्तावन्त एवार्थे तज्ज्ञाने चाभ्युपेयाः । 'चैत्रस्तण्डुलं पचति' इत्यत्र चैत्रपदं सुप्रत्ययस्तण्डुलपदमम्प्रत्ययः पचिधातुस्तिप्प्रत्ययश्चेति षडवयवात्मकस्य शब्दसमूहस्य चैत्रः कर्तृत्वं तण्डुलः कर्मत्वं तेजःसंयोगः कृतिश्चेति विशकलिताः षडर्थाः । तेषां च परस्परसमभिव्याहारस्य तु परस्परसंबन्धविशेषोऽर्थः । तत्तत्पदार्थविशिष्टा भावनैव वाक्यार्थ इति मीमांसकाः । तत्तदितरव्यावृत्तिर्वाक्यार्थ इत्यपि केचित् । एवं तज्ज्ञानमपि षट् पदार्थांस्तत्संबन्धादींश्च विषयीकुर्वत्तत्समानाकारं भवति, अन्यथा ज्ञानानां परस्परवैलक्षण्यानुपपत्तेः । अन्तःकरणपरिणामविशेषरूपे ज्ञाने तत्तदाकारत्वेन परिणतत्वकल्पनसंभवाच्च । अत एव 'चैत्रस्तण्डुलं पचतीत्याकारकं ज्ञानम्' इत्येव सकलतान्त्रिकाणां निराकारवादिनामपि व्यवहारः । अनयोः सृष्ट्योर्ज्ञानजनकं तु मन एव । तच्च शब्दं श्रोत्रे-

न्द्रियद्वारैव गृह्णाति, अर्थं तु कंचन साक्षात्कंचन चक्षुरादिद्वारेति विशेषः। ते च द्वे अपि सृष्टी स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमभेदात्प्रातिस्विकं चतुर्विधे। श्रोत्रमनसोस्त्वर्थान्तःपातित्वादेव चातुर्विध्यम्। एवं च स्थूलश्रोत्रेण स्थूलशब्दश्रवणात्स्थूलार्थस्य स्थूलमनसा ज्ञानम्, सूक्ष्मश्रोत्रेण सूक्ष्मशब्दश्रवणात्सूक्ष्मार्थस्य सूक्ष्ममनसा ज्ञानमित्यादि द्रष्टव्यम्। श्रोत्रमनसोः सूक्ष्मत्वादिकं तु शास्त्राभ्यासयोगाभ्यासादिपाटवजन्यम्। तदेतद्योगशास्त्रे 'निर्विचारवैशारद्येऽध्यात्मप्रसादः' इति सूत्रे 'ऋतंभरा तत्र प्रज्ञा' इति सूत्रे च स्पष्टम्। अत एव श्रुतिः—'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥' इति। तेषां च नामानि वैखरी मध्यमा पश्यन्ती परेति। श्रुतौ तुरीयपदस्य वैखर्यर्थः, सृष्टिक्रमस्यैव तत्राभिप्रेतत्वात्। एतच्छब्दचतुष्टयवाच्या अप्यर्थास्तथा तथोन्नेयाः। तथा हि—मस्तकाद्यवयवेन्द्रियप्राणदशकशालित्वं स्थूलजगदादिव्यक्तौ तथा सद्योजातशिशावपि पिपीलिकाऽऽदावपीत्यविवादम्। इयांस्तु विशेषः; स्थूला अवयवाः स्थूलेऽल्पास्त्वल्पे। एवं च वैखरीरूपघटपदवाच्यापेक्षया मध्यमाऽऽदिरूपघटपदैर्वाच्या घटा युक्तिभिरुन्नेयाः। ते च पदार्थाः संकोचमञ्चन्तः केचिदस्पष्टनिखिलावयवकाः केचित्तु संकुचज्जलूकाकमठादिवदस्पष्टकिंचिदवयवका अप्यवयवन्यूनाधिकभावेन परिमाणभेदेऽपि द्रव्याभेदस्य मीमांसकादिभिरङ्गीकारादिति यथायथमूहितव्यम्। एतेषां चतुर्णां वाचकानां चतुर्भ्यो वाच्येभ्यो भेदा अपि चत्वारः कल्पिताः स्थूलादिरीत्या चतुर्विधा ज्ञेयाः। सृष्टिचतुष्टयस्यापि मूलभूतो बिन्दुर्बीजस्थानापन्नः। तस्मादपि परतस्तु सूक्ष्मतमापेक्षया सूक्ष्मतममपि विशिष्य तद्वाचकत्वादभिन्नशब्दार्थरूपं शब्दब्रह्मेत्यादिपदनिर्देश्यं परं ब्रह्मैव। तच्च प्रकाशैकाकारस्यार्थादत्यन्तभिन्नस्य शब्द-
[illegible] 'अनिर्देश्यम्' 'अग्राह्यम्' 'अशब्दम्'

'अस्पर्शम्' इत्यादिनिषिद्धविशेशेणम्। वस्तुतः सृष्टिद्वयमूलभूतसूक्ष्मरूपविशेषात्मकत्वादभिन्नशब्दार्थरूपं शब्दब्रह्मेत्यादिपदनिर्देश्यं परं ब्रह्मैव। तच्च प्रकाशैकस्वरूपम्, 'घटः स्फुरति,' पटः स्फुरति' इत्यादिप्रत्ययेन पदार्थमात्रे स्फुरणाख्यवस्तुविशेषस्य[1] तत्तदभिन्नस्यानुभवसिद्धत्वात्। प्रकाशस्यापि स्फुरणमवश्यं वाच्यम्, 'प्रकाशः स्फुरति' इति प्रत्ययात्। तच्च स्फुरणं शक्तिरित्युच्यते। प्रकाशस्फुरणयोश्च मिलितयोरेव जगत्कारणत्वम्, अन्यतरमात्रस्य जनकत्वानुपपत्तेः कामकलाविलासव्याख्यायां [2]स्फुटतरमुपपादनात्। तेन शुद्धस्य शिवस्य शुद्धायाः शक्तेर्वा जगत्कारणत्वं तत्र तत्रोच्यमानं शिवशक्तिरूपस्योभयात्मन एव बोध्यम्। तत्र प्रकाशस्त्वकारस्वरूपस्तद्वाच्यश्च। स्फुरत्ता तु हकाररूपा तद्वाच्या च। तावेतावकारहकारौ परारूपौ सूक्ष्मतमौ प्रागुक्तौ। पराऽऽदिसृष्टिमूलभूतस्य बीजस्थानीयस्य बिन्दुविशेषस्य तु व्यक्ताव्यक्तविलक्षणौ वाचकौ। तस्यापि जनकस्य परब्रह्मणस्तु केवलमव्यक्तावेव शून्यस्वरूपौ वाचकौ। तयोः शून्यस्वरूपत्वादेव 'यतो वाचो निवर्तन्ते' (तै० उ० २–४) इत्यादिश्रुतिभिरवाच्यतोक्तिः, वाच इति बहुवचनेन पराऽऽदिचतुष्टयस्यैव परामर्शात्। तथा च स्मर्यते—'अहमित्येकमद्वैतं यत्प्रकाशात्मविभ्रमः। अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः॥ हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः। अनयोः सामरस्यं यत्परस्मिन्नहमि स्फुटम्॥' इति। 'अक्षराणामकारोऽस्मि' इति गीतासु[3]। 'शून्याकाराद्विसर्गान्ताद्बिन्दुप्रस्पन्दसंविदः' इति योगिनीहृदये च[4]। शून्याकारः शून्यमात्रस्वरूपो यो विसर्गान्तः षोडशस्वरान्त्य-

[1] ०विशेषणस्य.

[2] स्पष्टतरः.

[3] गीता च.

[4] योगिनीहृदयं च.

स्तस्माद्बिन्दुविशेष उत्पन्न इति तदर्थः। विसर्गस्याव्यक्तहकारतुल्यत्वेनाकार-
स्यापि तत्र सत्त्वेन षोडशस्वरकीर्तनं प्रकृतम्। तेनाकारहकारावेव शून्या-
कारौ कीर्तितौ वेदितव्यौ। अत एव शून्यश्चासावकारश्चेति केचिद्व्याख्याय
विसर्गो हकारः स एवान्ते यस्येति विग्रहप्रदर्शनपूर्वकं हकारविशिष्टादका-
रादिति व्याचक्षते। तन्मते हकारे शून्यत्वलाभो दुर्घटः। अत्रायं
सृष्टिक्रमः—यथा हि कश्चित्पुरुष उत्पत्स्यमानपुत्त्राद्यदृष्टवशादुत्पाद-
नेच्छाविशिष्टः स्वीयामुत्पादनशक्तिमवलोक्य स्वार्धशरीरात्मिकायां भार्यायां
स्वयमन्तः प्रविशति शुक्ररूपेण, 'पतिमेकादशं कृधि,' 'आत्मा
वै पुत्त्रनामाऽसि' इति श्रुतेः। प्रवेश्यमानस्य स्वभिन्नत्वात्स्थूलतरभेदा-
क्रान्तत्वाच्च नाभेदभानम्। ततस्तस्य शुक्रस्यान्तः शोणितबिन्दुरूपेण भार्या
प्रविशति। तेन च स बिन्दुरुच्छूनो भवति। स एष वटोदुम्बरादिबीज-
स्थानीयः। तस्मादङ्कुरविशेषाद्युत्पत्तिक्रमेण कालान्तरे पुत्त्राद्युत्पत्तिरिति।
यथा वा सूर्याभिमुखदर्पणे तदन्तःप्रविष्टकिरणादुभयकिरणसंकलनरूपस्तेजो-
बिन्दुविशेषः कुड्यादौ प्रादुर्भवति, तथा प्राण्यदृष्टवशात्स्वान्तःसंहृतविश्वसि-
सृक्षया प्रकाशरूपं ब्रह्म स्वीयां शक्तिमवलोकयितुं तदभिमुखीभूय तदन्त-
स्तेजोरूपेण प्रविश्य शुक्रबिन्दुभावमयते। ततस्तं बिन्दुं रक्तरूपा शक्तिः
प्रविशति। तेन संमिश्रबिन्दुरुच्छूनो भवति। तत्र च हार्दकलारूपो
ऽप्येकः पदार्थविशेषो भवति। स पुनर्गुरुमुखादेवावगन्तव्यः, न पुनः
पुस्तके लेख्यः। स च बिन्दुः समष्टिरूपेणैकः स्फुटशिवशक्तिसामरस्यनामा
'कामो रविरग्नीषोमात्मकः' इत्यादिशब्दैर्व्यवह्रियते। व्यष्टिरूपेण द्वयम्।
तत्र शुक्ल इन्दू रक्तोऽग्निरिति बिन्दुद्वयात्मकत्वाद्विसर्ग इति च व्यवह्रियते।
अत एव च रवे रात्रावग्नावमावास्यायां चन्द्रे च प्रवेशस्य श्रुत्यादिसिद्ध-
[illegible] युक्तम्। एवं च कामाख्यो बिन्दुर्विसर्गो हार्दकला चेति

त्र्यवयवक एकः पदार्थोऽणादिप्रत्याहारवत्कामकलेत्युच्यते । इदमेव च [1]समस्तसृष्टिबीजम् । अत एवाकारहकारयोर्मध्ये सर्ववर्णपाठः । ळकारस्य लकारादभिन्नत्वात्, क्षकारस्य कषयोगरूपत्वान्न तद्बहिर्भावः शङ्क्यः । एतन्मूलभूतं ब्रह्म तु तुरीयबिन्दुरित्युच्यते । तद्रूपाभ्यां शून्यस्वरूपाभ्यामकारहकाराभ्यामुत्पन्ना कामकला व्यक्ताव्यक्तविलक्षणाऽहंपदवाच्या । अकारहकारोभयात्मकत्वं शिवशक्तिद्वयरूपत्वं चाहंपदस्य निष्कृष्टोऽर्थः । अत एव तज्जन्यानां सूक्ष्मादिस्थूलान्तानामखिलसृष्टीनामहंपदवाच्यत्वम् । यथा ह्युदुम्बरपदवाच्यबीजाज्जनितानां परस्परविलक्षणानामपि पर्णकाष्ठकुसुमफलक्रिमीणां सर्वेषामुदुम्बरत्वम्, 'उदुम्बरपर्णम,' 'उदुम्बरक्रिमिः' इत्यादिव्यवहारात । तथा च श्रुतयः—'ब्रह्म वा इदमग्र आसीत्; तदात्मानमेवावेदहं ब्रह्मास्मीति' इति बृहदारण्यके; 'त्वं वा अहमहं वै त्वम्, इत्यैतरेयके; 'कस्त्वमित्यहमिति होवाच त्वमेवेदं सर्वं तस्मादहमिति सर्वाभिधानम्' इति तापिनीये । पाणिनिनाऽप्यस्मच्छब्दस्य सर्वनामतोक्ता । तत्रैवान्यत्र 'तद्वा एतद्ब्रह्माद्वयम्' इत्यादिना ब्रह्मस्वरूपमभिधाय तदुपासनां पूर्णाहंभावभावनारूपां विस्पष्टम् 'हंसः सोऽहम्' इत्यादिना विदधाति । तत्प्रकारस्त्वतिरहस्यत्वाद् गुरुचरणैकलभ्यः । उक्तं च कादिमते—'बन्धनं योनिमुद्राया मन्त्राणां वीर्ययोजनम् । गुरोर्लक्षणमेतावदादिमान्त्यं तु वेदयेत् ॥' इति । आदिमोऽकारः, अन्त्यो हकारः, तयोः समाहारः 'अहम्' । बिन्दुलाभायैवेतरेतरयोगद्वंद्वपरित्यागेन समाहारद्वंद्वोक्तिः । छान्दोग्येऽपि 'अहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वम्' (७-२५-१) इति । विरूपाक्षपञ्चाशिकायामपि—'स्वपराव-

[1] समष्टि.

भासनक्षम आत्मा विश्वस्य यः प्रकाशोऽसौ । अहमिति स एक उक्तो ऽहंतास्थितिरीदृशी तस्य ॥' इत्यादीनि परःसहस्रं वचनानि । एतादृशस्याहं-पदार्थस्य यथाऽहमिति पदं वाचकं तथोत्तमपुरुषैकवचनमपि वाचकम् । तस्य च परस्मैपदात्मनेपदभेदेन द्वैविध्येऽपि मिप इटश्चेकारत्वेनानुगमादि-त्वमेव शक्तताऽवच्छेदकम्, 'अन्यायश्चानेकशब्दत्वम्' इति न्यायात् । तस्य च धातूत्तरत्वेनोत्तमपुरुषत्वादिना वोपस्थितिः पदार्थस्मारकत्वे तन्त्रम् । एर्णलादावपि लुप्तस्य स्मरणम्[1] । तदभावे शक्तिभ्रमाद्बोध इत्यादि यथा-यथमूह्यम् । तत्र चाकारहकारयोरवयवयोरदर्शनेऽपि शास्त्रप्रामाण्यात्सूक्ष्म-रूपौ तौ स्त इति स्वीकार्यम् । तस्यैव च हार्दकलायोगे दीर्घताऽपि संपद्यत इति तुरीयस्वरस्य कामकलारूपत्वं मन्त्ररहस्यविद्भिः प्रतिपाद्यते । तदुक्तं योगिनीहृदये—'मध्यबिन्दुविसर्गान्तःसमास्थानमये परे । कुटिला-रूपके तस्याः प्रतिरूपं वियत्कले ॥' इति । मध्यबिन्दुः कामाख्यः, तस्य तुरीयबिन्दुविसर्गमध्यपातित्वात्, समष्टेर्व्यष्टिमध्य एवान्तर्गतत्वाच्च । विसर्गो व्यष्टिरूपं बिन्दुद्वयम्, तयोरन्तर्मध्ये सम्यक्चैतन्यात्मनाऽवस्थानम् । तन्मये तत्प्रधाने । परे चरमेऽकारहकाररूपेऽक्षरे, मातृकाणां क्रमेण पाठे चरमत्वाद्धकारस्य, व्युत्क्रमेण पाठे त्वकारस्य चरमत्वात् । किं च, इमे अक्षरे कुटिलारूपके । कुटिले अकुलकुले कुण्डलिन्यौ तयो रूपान्तरे । तावता कामविसर्गयोः किमायातमित्यत आह—तस्या इति । तयोः कुण्डलिन्योरित्यर्थः । वियत्पदेन शून्याकारत्वात्कामः प्रतिपाद्यते । कलापदेन च हार्दकलावत्त्वाद्विसर्गः । यतः कामविसर्गयोः कुण्डलिनीप्रतिबिम्बरूपत्वं ततः कुण्डलिन्यभिन्नाकारहकाररूपत्वं संभवतीति भावः; इत्यस्य श्लोकस्य सांप्रदायिकी रहस्यव्याख्या । एवमकारहकारैकस्वरूपा कामकला । तदुक्ते

[1] तस्य स्मरणम् .

मन्त्रे विजातीयाक्षरवत्त्वान्यथानुपपत्त्याऽपि तयोर्गर्भे सूक्ष्मरूपेणान्येषां वर्णानामर्थसृष्टेश्चावस्थानं सिध्यति यथा वटबीजरूपसंपुटे पर्णकाष्ठादेः। किं च, वटादिबीजानां स्फोटेनैवाङ्कुराद्युत्पत्तिरिति बीजस्य पूर्वार्धोत्तरार्धयोर्वियोग इत्यविवादम्। तच्चार्धद्वयं महति वृक्षे कस्मिन्कस्मिन्भागेऽस्तीति तु दुर्ज्ञेयम्। एवं मन्त्रेऽपि बीजांशयोरकारहकारयोरवस्थितयोः परिज्ञानाय संकेतभाषयोक्तं योगिनीहृदये—'मध्यप्राणप्रथारूपस्पन्दव्योम्नि स्थिता पुनः। मध्यमे मन्त्रपिण्डे तु तृतीये पिण्डके पुनः। राहुकूटाद्वयस्फूर्जत्' इति। अस्यार्थः—कलाकामयोर्मध्यस्य विसर्गस्य यः प्राणश्चैतन्यं तस्य प्रथा पृथुत्वेन श्रूयमाणता। स्थूलतेति यावत्। तद्रूपं यत्स्पन्दव्योम हकारः, स्पन्दत उत्पद्यत इति स्पन्दः। स्पन्दो व्योम यस्मादिति व्युत्पत्तेः। 'हकाराद्व्योम संभूतम्' इत्युक्तेरिति केचित्। मध्यात्मको विसर्गाभिन्नो यः प्राणो हकारस्तस्य प्रथारूपो यः स्पन्दः। स्थूलरूपा सृष्टिरित्यर्थः। तद्रूपं व्योम हकार इत्यर्थो युक्तः, 'हः शिवो गगनं प्राणः' इति मातृकाकोशात्। मध्यम इत्यस्य द्विरन्वयः। तत्रैकं पदं मन्त्रपिण्डेन सह सामानाधिकरण्येनान्वेति, अपरं वैयधिकरण्येन। मध्यमकूटस्य मध्यमव्यञ्जने। द्वितीयहकार इत्यर्थः, द्वितीयगेषु सप्तसु व्यञ्जनेषु तस्य चतुर्थत्वेन मध्यमत्वात्। तत्र स्थिता। स्त्रीलिङ्गाच्छक्तिर्विशेष्या। तृतीयकूटे तु सकारेऽकारो मूलबीजीय इत्याह—राहुकूटेति। लघुषोढान्यासान्तर्गतग्रहन्यासे राहोः शषसहाख्यवर्णचतुष्टयसहितस्य वक्त्रे न्यासः, 'वक्त्रे शादिचतुर्वर्णैः सहितं राहुमेव च' इति वचनात्। तेन शादिचतुष्कं राहुकूटम्। तत्र द्वयाद्भिन्नोऽद्वयस्तृतीयः सकारः तस्मिन्स्फूर्जच्छोभमानम्। नपुंसकलिङ्गबलाद्ब्रह्म विशेष्यम्। शिव इत्यर्थः। इत्यलमतिरहस्यार्थप्रकाशनेन ॥ ६७, ६८ ॥

This Vidyā originating from the seven different letters made up of the six Vāmā, Icchā, etc., and *ikāra* repeated three times is identical with the S'akti-s (indicated by them). (67)

The Para-devatā (Supreme Goddess) who is the aggregate of the seven S'akti-s, Vāmā, etc., and is the embodiment of the thirty-six Tattva-s, does not differ from this Mantra even by the smallest measure. (68)

तदेतत्सर्वमभिसंधायाह—

अहकारौ शिवशक्ती शून्याकारौ परस्पराश्लिष्टौ ।
स्फुरणप्रकाशरूपावुपनिषदुक्तं परं ब्रह्म ॥ ६९ ॥
विश्वसिसृक्षावशतः स्वार्धां शक्तिं विलोकयद्ब्रह्म ।
बिन्दूभवति तमिन्दुं प्रविशति शक्तिस्तु रक्तबिन्दुतया ॥७०॥
एतत्पिण्डद्वितयं विसर्गसंज्ञं हकारचैतन्यम् ।
मिश्रस्तु तत्समष्टिः कामाख्यो रविरकारचैतन्यम् ॥ ७१ ॥
एषाऽहंपदतुर्यस्वरकामकलाऽऽदिशब्दनिर्देश्या ।
वागर्थसृष्टिबीजं तेनाहंतामयं विश्वम् ॥ ७२ ॥
अन्त्यप्रथमे मध्यचतुर्थे मन्त्रेऽपि तौ व्यक्तौ ।
तेनाम्बामनुजगतामभेद एवात्र भावार्थः ॥ ७३ ॥

अत्र शिवबिन्दोः शुक्लत्वाच्चन्द्रात्मकत्वाद्बिन्दुवाचकत्वाच्चन्द्रपदाना-मिन्दपदेन बिन्दुनिर्देशः कृतः । भावार्थ इति । भावो जन्म । 'भावः

सत्तास्वभावाभिप्रायचेष्टाऽऽत्मजन्मसु ' इत्यमरः । स एवार्थः प्रयोजनं ज्ञेयत्वाद्यत्र सः, अर्थो ज्ञेयो यत्रेति वा । ' अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ' इत्यमरः ॥ ६९ — ७३ ॥

The *Akāra* and *Hakāra*, which are identical with S'iva and S'akti, which are devoid of form, which embrace each other and which throb and shine, are (no other than) the *Para* (Supreme) *Brahman* mentioned in the Upaniṣad-s. (69)

The *Brahman*, with the desire to create the Universe, cast Its eyes on Its (other) half (consort) S'akti and assumed the form of a Bindu (sperm) into which again S'akti enters assuming the form of a Rakta-bindu (ovum). (70)

This couple of Bindu-s is known as Visarga and carries the psychic force of *Hakāra*. The mixture formed by their aggregation is the sun, known as Kāma, and carries the psychic force of *Akāra*. (71)

This which is variously styled as the word Aham, the fourth vowel (*Ī*), Kāma-kalā, etc., is the prime cause of the entire creation (assuming the form) of words and things. Hence the Universe is full of egotism. (72)

These two are manifest in the Mantra itself as the first (letter) of the last group and the fourth (letter) of the middle Group. Hence, the identity of the Goddess, the Mantra, and the Universe is established as *Bhāvārtha*. (73)

अथ संप्रदायार्थमाह —

व्योमादिजनकहकरसलवर्णैर्घटनेन पञ्चभूतमयी ।
पञ्चचतुस्त्रिद्व्येकगशब्दादिगुणात्मपञ्चदशवर्णा ॥ ७४ ॥

व्योम आकाशः । आदिना वाय्वग्निजलभूमिपरिग्रहः । एतत्पञ्चकस्य जनका ये हकरसलार्णा हकारादिवर्णास्तैर्घटनेनेयं विद्या पञ्चभूतमयी पञ्चभूताभिन्ना । उक्तं च — 'हकाराद्व्योम संभूतं ककारात्तु प्रभञ्जनः । रेफाद्ग्निः सकाराच्च जलतत्त्वस्य संभवः । लकारात्पृथिवी जाता तस्माद्विश्वमयी च सा ॥' इति । अत्र यद्यपि प्रकाशविमर्शसामरस्यात्मकवस्तुविशेषस्यैव शब्दार्थसृष्टिजनकत्वमविशिष्टं तथाऽपि प्रकाशांशस्यैवार्थसृष्टौ विमर्शांशस्यैव शब्दसृष्टौ जनकत्वम्, तयोः परस्परसापेक्षत्वेनैव स्वस्वकार्यजनकत्वस्य श्रुतिस्मृतिसिद्धत्वात् । एकस्य स्वकार्यजनकत्वेऽपरस्य तत्कारणताऽवच्छेदकत्वमावश्यकम् । एवं च कारणताऽवच्छेदककारणतयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण द्वयोरपि प्रातिस्विककारणत्वसिद्धिः । तदभिप्रायेणैव हि तन्त्रेष्वन्यतरस्यैव कारणताबोधकानि वचनानीति ज्ञेयम् । भगवता व्यासेनापि 'शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्' (ब्र० सू० १-३-२८) इति सूत्रे जगतः शब्दात्प्रभवः श्रुतिस्मृतिभ्यां सिद्ध इत्युक्तम्; तद्भाष्ये च निपुणतरमुपपादितम् । एवं च, प्रथमं विमर्शशक्तेर्हकार उत्पन्नस्ततः प्रकाशाद्व्योम; ततो विमर्शात्ककारस्ततः प्रकाशाद्वायुः; ततो विमर्शाद्रेफस्ततः प्रकाशाद्ग्निः; ततो विमर्शात्सकारस्ततः प्रकाशाज्जलम्; ततो विमर्शाल्लकारस्ततः प्रकाशात्पृथिवी; इत्येवं क्रमेण पञ्चमहाभूतोत्पत्तौ सत्यामपि हकारवद्विमर्शविशिष्टप्रकाशस्यैव व्योम प्रति कारणत्वादुक्तरीत्या कारणताऽवच्छेदकत्वस्य हकारे सिद्धेर्विनिगमनाविरहात्कारणत्वमपि सिध्यति । एवमेव ककारादिषु

द्रष्टव्यम् । न चैवं हकारादेर्वाय्वादिकं प्रत्यपि कारणत्वापत्तिः, उक्तरीत्या परम्परया कारणतायामवच्छेदकत्वात्, एवं व्योमादेरपि ककारादिकं प्रति जनकत्वापत्तिरिति न च वाच्यम्; तेषामन्यथासिद्धत्वादिष्टत्वाद्वा । ननु विद्यायां पञ्चभूतात्मकवर्णपञ्चकमेवास्तु किमधिकैर्वर्णैरित्यत आह—पञ्चेति । आकाशः पञ्चविधः, वायुश्चतुर्विधः, अग्निस्त्रिभागः, जलं द्विभागम्, पृथिव्येकविधेति पञ्चीकरणवार्त्तिकादौ स्पष्टम् । पञ्चादिसंख्याकानामाकाशादीनां गुणाः शब्दादयोऽपि तादृशसंख्याकाः । तेन व्योमादिषु पञ्चसु पञ्च शब्दाः, वाय्वादिषु चतुर्षु चत्वारः स्पर्शाः, अग्न्यादिषु त्रिषु त्रीणि रूपाणि, जलभूम्योर्द्वौ रसौ, पृथिव्यामेको गन्ध इत्येवं संहृत्य पञ्चदश गुणा विद्यास्थैः पञ्चदशभिर्वर्णैरभिन्ना इति पञ्चदशानां वर्णानामुपपत्तिरिति भावः । अथ पञ्चदशभिर्गुणैः पञ्चदशानां वर्णानामभेद उपादानोपादेयभावाद्वाच्यवाचकभावाद्धर्मधर्मिभावाद्वा वाच्यः । स च न संभवति । तथा हि—अत्र हि पञ्चदशसंख्याकत्वमचां प्राधान्येन व्यञ्जनानां तद्भक्तत्वेन चोपपादनीयम्; 'एष वै सप्तदशः प्रजापतिः' इति वेदे, 'चतुरश्छयतावाद्यक्षरलोपश्च' (वा० २१५८) इति पाणिनीयसूत्रवार्त्तिके, 'चतुःशतमुत्कृतिः' इत्यादिच्छन्दःसूत्रेषु च तथैव निर्णीतत्वादित्यस्यार्थस्य च्छन्दोभास्करेऽस्माभिः सविस्तरमुपपादनात् । न ह्यत्रत्यानां पञ्चदशानामचां गुणजनकत्वं गुणवाचकत्वं गुणाश्रयत्वं वा संभवति, मानाभावात् । ननु—हकारपञ्चकस्य व्योमपञ्चकजनकत्वेन तद्वाचकत्वेन चाभेदे सिद्धे तद्गुणैः शब्दैरपि सहाभेदः सिद्धप्राय एव, गुणगुणिनोरभेदेन गुणस्य गुण्यभिन्नाभिन्नत्वस्य न्यायसिद्धत्वात् । यथैव वाच्यवाचकभावस्याभेदे नियामकता तथैव लक्ष्यलक्षकभावस्यापि । अस्ति हि प्रकृते हकाराणां शब्दलक्षकत्वम्, शब्दस्य

हकारशक्यसंबन्धित्वात् । अत एव योगिनीहृदये 'व्योमबीजैस्तु विद्यास्थैर्लक्षयेच्छब्दपञ्चकम्' इत्युक्तम् । यत्तु शक्यसंबन्धप्रदर्शनकारिकायां तत्रैवोक्तम् 'भवेद् गुणवतां बीजं गुणानामपि वाचकम् । कार्यकारणभावेन तयोरैक्यविवक्षया ॥' इति, तत्र लक्षकेऽपि वाचकपदप्रयोगो वाचकनिष्ठस्य स्वबोध्याभेदंव्याप्यत्वस्य लक्षकेऽपि तुल्यत्वद्योतनफलको गौण्या वृत्त्यैवोपपद्यते । एवं वायुवाचकादीनामपि स्पर्शाद्यभेद उपपादनीयः । न च तथाऽपि पञ्चदशानामचां तदभेदो न संभवतीति वाच्यम्; न हि प्रकृतेऽपि अच एव विवक्षिता इति नियमः; हकारादिव्यञ्जनैरपि पञ्चदशसंख्योपपादनसंभवात् । न च संख्याऽऽधिक्यम्, आधिक्येऽपि 'सहस्रे शतं संभवति' इति न्यायस्य जागरूकत्वात्, 'गुणाः पञ्चदशाख्याता भूतानां तन्मयी शिवा' इति वचनस्थस्य तन्मयीत्यस्य भूतमयी गुणमयी पञ्चदशसंख्याकावयववती विद्या देवी वा शिवेत्यर्थवर्णनसंभवादिति चेन्न; 'व्याप्ता पञ्चदशार्णैः सा विद्या भूतगुणात्मिका । पञ्चभिश्च तथा षड्भिश्चतुर्भिरपि चाक्षरैः ॥' इति स्फुटतरवचनविरोधात् । तत्र हि सामान्येन पञ्चदशसंख्याकाक्षरवत्त्वमुपपाद्य संभावितनानाशङ्कापरिहाराय विशिष्य विशिष्य कूटत्रयाक्षराणां गणनयाऽज्भिरेव सव्यञ्जनैः संख्यापूर्तिरित्यस्य स्पष्टं निर्धारितत्वादिति । अत्र ब्रूमः—सत्यमज्भिरेव पञ्चदशत्वम्; तथाऽपि हकारादिव्यञ्जनानामेव गुणाभेदः; तेषामेव तद्वाचकत्वात् । शक्तताऽवच्छेदकं तु पञ्चदशसंख्यासमवायित्वसमानाधिकरणहकारत्वादिकं न पुनः शुद्धहकारत्वादिकम्, अन्यथा हकारेण व्योमवाचकेन प्रकृते शब्दलक्षणायां युगपद्वृत्तिद्वयविरोधापत्तेः । शब्दैक्येऽपि शक्तताऽवच्छेदकरूपधर्मद्वयभेदेनार्थद्वयभानमुपपद्यते । कथमन्यथा लिङादौ शब्दभावनाऽर्थभावनयोः शक्त्या भानं लक्षणया च कर्तुर्भानं मीमांसकानाम् ?

अत एव चोक्तश्लोके 'गुणानामपि वाचकम्' इत्येवोक्तम् । यत्तु तत्पूर्वश्लोके 'लक्षयेत्' इति पदं तद्बोधयेदित्यर्थकम् । अस्तु वा लक्षणाऽपि, भिन्नधर्मावच्छिन्नस्य पदस्यैकधर्मपर्याप्तावच्छेदकताकशक्ततालक्षकतारूपवृत्तिद्वययौगपद्यस्यैव विरुद्धत्वात् । •वाचकपदमेव संजातप्रतिपक्षत्वादुपक्रमन्यायेनान्वयितव्यम्[1] । वस्तुतस्तु गुणवतां वाचकं बीजं गुणानामपि वाचकमित्यन्वयः । बीजे गुणवद्वाचकत्वं परिकरालंकारवद्धेतुत्वाभिप्रायगर्भम् । हकारस्य शब्दवत्येव शक्तिर्न पुनराकाशमात्रे । तेन च गुणस्य शक्यताऽवच्छेदकत्वेन शक्यताऽवच्छेदकेऽपि शक्तेः प्राचीनैरङ्गीकाराद् गुणानामपि वाचकमित्यर्थः । तेन 'लक्षयेत्' इत्येतज्ज्ञानार्थकम् । तेनैकैव शक्तिरुभयत्रेत्यतो न वृत्तिद्वयविरोधो न वा शक्तताऽवच्छेदकभेदकभेदगवेषणा । पञ्चदशानां वर्णानां पञ्चदशगुणाभेदकथनं तु 'दश संपद्यन्ते । दशाक्षरा विराट् । अन्नं विराट्' इत्यादिवत्स्तुतिमात्रमित्यादि बुद्धिमद्भिरूह्यमिति संक्षेपः ॥ ७४ ॥

(This Vidyā), containing as it does the letters *Ha*, *Ka*, *Ra*, *Sa* and *La*, the progenitors of Vyoman (Ether) and others, is identical with the five elements and (hence) contains (in all) fifteen Varṇa-s representing as many Guṇa-s (of the elements) as follows: S'abda-s, Spars'a-s, Rūpa-s, Rasa-s and Gandha, five, four, three, two and one in number respectively. (74)

इदानीम् 'प्रधानं तेजसो रूपं तद्बीजेन हि जन्यते' इतिवचनस्वारस्यमनुसंदधानो गुणानां गुणिबोधकाक्षरबोध्यत्ववत्तज्जनकाक्षरजन्यत्वस्यापि सत्त्वादभेदः संभवतीत्याह—

[1] •नान्यथयितव्यम् .

तत्तज्जनकैर्वर्णैस्तत्तत्संख्यैस्तु तद्गुणा जाताः ।
कामकलाभिश्चतसृभिरासीत्स्पर्शश्चतुर्विधो न तु कैः ॥ ७५ ॥

तत्तज्जनकैर्व्योमादिजनकैः । तत्तत्संख्यैः पञ्चादिसंख्याकैः । तद्गुणा व्योमादिगुणाः । पञ्चादिसंख्याका इति शेषः । विद्यायां हि मायात्रये हकारत्रयम्, मध्यमकूटे हकारौ द्वौ, एवं पञ्चभिर्हकारैः पञ्च शब्दा उत्पन्नाः । अत एव तेषामर्थाः शब्दा एव, 'ये ये यद्यज्जनकास्तेषां तेषां त एवार्थाः' इति वक्ष्यमाणत्वात् । उक्तं च 'व्योमबीजैस्तु विद्यास्थैर्लक्षयेच्छब्दपञ्चकम्' इति । ननु भावार्थप्रकरणे मध्यमहकारस्य विद्यामूलबीजात्मककामकलाऽर्थरूपत्वमुक्तमिति तस्य शक्तिवाचकत्वमेव युक्तं न पुनः शब्दलक्षकत्वमिति चेत्; न ह्येकवाचकत्वमपरालक्षकत्वे तन्त्रम्, वृत्तिद्वयविरोधस्य परिहृतत्वात् 'गङ्गायां घोषमत्स्यौ' इत्यादौ तस्येष्टत्वाच्च । वस्तुतस्तु, शिवशक्त्यात्मकमूलबीजात्मकावकारहकारौ तु सूक्ष्मतमादप्यत्यन्तसूक्ष्मरूपावित्युक्तम् । इह तु वैखर्यात्मकस्थूलरूपयोरेवार्थान्तरपरत्वमुच्यते । अत एव मध्यप्राणेत्यनेन तादृशसूक्ष्मरूपतां द्योतयित्वा तस्य प्रथारूपो यः स्पन्दः स्थूलात्मिका सृष्टिस्तद्रूपे व्योम्नि हकारे स्थितेत्युक्तं न पुनः स्थूलहकार एव शक्तिरिति । उक्तं च 'तेषां कारणरूपेण स्थितं ध्वनिमयं परम्' इति । तेषां शब्दानाम् । शब्दसृष्टेः सर्वस्यापीत्यर्थः । कारणं शक्तिः, तस्या रूपं सूक्ष्मतमादपि परम् । तादृशेन रूपेणोपलक्षितं सद् ध्वनिमयम् । ध्वन्यभिन्नं सत्स्थितं परं परब्रह्मेत्यर्थः । सर्वेष्वपि वर्णेषु वर्णांशध्वन्यंशौ परस्परसंसृष्टौ वर्तेते सुवर्णे परस्परसंसृष्टपार्थिवतैजसांशवत्, कत्वादिवर्णधर्माणां तारत्वमन्द्रत्वषड्जत्वादिध्वनिधर्माणां च सर्ववर्णेष्वनुभूयमानत्वात् । अत एव शारीरकभाष्ये स्फोटनिरासाय वर्णानामेव

नित्यत्वमङ्गीकर्तुं तेषामेकैकव्यक्तिरूपत्वमुपपाद्य वैलक्षण्यप्रतीतिः सर्वाऽपि ध्वन्यालम्बनत्वेनोपपादिता देवताऽधिकरणे। तथा च मध्यमहकारे ध्वन्यंशः परब्रह्मवाचकः, वर्णांशस्तु शब्दलक्षक इति विवेक इति भावः। ये तु हादिविद्यापक्षपातिनो योगिनीहृदयस्य संपूर्णतन्त्रस्यापि हादिविद्याया-मेव तात्पर्यमिति मन्यमाना इहान्यथा व्याचक्षते—'परं षष्ठं हाक्षरं तेषां पञ्चानामपि शब्दानां कारणभूतो यो ध्वनिर्नादस्तन्मयं तद्वा-चकम्' इति, तेषां तत्र ग्रन्थस्वारस्यभङ्गेन क्लिष्टतरं व्याख्यानमेव शरणमिति तत्र तत्र स्पष्टीकरिष्यामः। ननु तथा सति वायुजनक-ककाराणामेव चतुर्विधस्पर्शजनकत्वस्यावश्यिकत्वात्ककाराणां च चतुर्णाम-भावादनुपपन्नमिदमित्याह—कामकलाभिरिति। महामायायां त्रय ईकारा एकस्तृतीयाक्षररूपश्चेति चतुर्भिरीकारैश्चतुर्धा स्पर्श उत्पन्नो न पुनः ककारैरित्यर्थः। तदुक्तम्—'महामायात्रयेणापि कारणेन च बिन्दुना। वाय्वग्निजलभूमीनां स्पर्शानां च चतुष्टयम्। उत्पन्नं भावयेद्देवि स्थूलसूक्ष्म विभेदतः।' इति। महामायायां यत्त्रयमीकारत्रयं तेन, कारणेन च केवलेनेकारेण च, तस्यैव विश्वकारणत्वस्य पूर्वमुक्तत्वात्। बिन्दुनेति काम-कलाचतुष्कस्यापि विशेषणम्, तस्य तत्र त्रिबिन्द्वात्मकत्वात्तुरीयबिन्दुजन्य-त्वाद्वा। तच्च वायुमण्डलस्य बिन्दुलाञ्छितत्वद्योतनाय। स्थूलो व्यापको वायुगतः। सूक्ष्मा व्याप्या अग्न्यादित्रयनिष्ठाः। हादिपक्षपातिनस्तु ककाराणां कामकलानां च हादिविद्यायां त्रित्रिसंख्याकत्वेन चतुर्थाला-भाद्बिन्दून्विभज्य गणयन्ति। तत्पक्ष एकैकस्याः कामकलायास्त्रित्रिबिन्द्वात्म-कत्वेन नव संपद्येरन्। विसर्गत्वेन बिन्दुद्वयस्यैक्ये तु विसर्गास्त्रयः कामास्त्रय इति षट्। कामत्वेन त्रयाणामैक्यं तु विसर्गत्वेनापि त्रयाणामैक्यापाताद् द्वयम्। तुरीयबिन्दोरपि मेलने तु विभागे द्वादश, तदभावे त्रयमिति सर्वथा

न चतुःसंख्यासिद्धिः। महामायायां कामकलायां यद्बिन्दुत्रयं तेन, कारणबिन्दुस्तुरीयस्तेन चेति व्याख्याने त्वन्ययोरीकारयोर्वैयर्थ्यमिति स्पष्टम्। न च गुणगुणिनोरेकमेव कारणं कपालादेरेव घटतद्गतरूपे प्रति कारणत्वादिति नियमो व्योमशब्दजनकहकारादाविष्टो भज्येतेति वाच्यम्, तस्य वचनबलात्पाकेनापि रूपाद्युत्पत्तिदर्शनेन चौत्सर्गिकत्वात्। त्रिविधरूपं तु मायाऽन्तर्गतैस्त्रिभी रेफैर्जन्यते, 'रूपाणां त्रितयं तद्वत्त्रिभी रेफैर्विभावितम्' इति वचनात्। एवं रसद्वयं सकारद्वयेन, 'विद्यास्थैश्चन्द्रबीजैस्तु स्थूलः सूक्ष्मो रसः स्मृतः' इति वचनात्। चन्द्रबीजैः सकारैः। स्थूलो व्यापको जलगतः। सूक्ष्मो व्याप्यो भूगतः। 'पदमभ्यधिकाभावात्स्मारकान्नातिरिच्यते' इति न्यायेन पदार्थोपस्थितेः स्मृतिरूपत्वात्स्मृत इत्युक्तम्। यद्यपि कादिविद्यायां द्वावेव सकारौ, तथाऽपि 'विद्यास्थैश्चन्द्रबीजैः' इति बहुवचनाभ्यामपि रसस्य द्वैविध्यात् 'अक्षीणि मे दर्शनीयानि,' 'पादा मे सुकुमाराः' इति महाभाष्यप्रयोगाद् द्वित्वसंख्यैव लक्ष्यते। अत एव स्थूलसूक्ष्मपदगतप्रत्येकैकवचनाभ्यां द्वित्वमेव स्पष्टीकृतम्। ननु—व्योमबीजेन [1]व्योमगुणलक्षणा युक्ता, शक्यसंबन्धात्। चन्द्रवाचकबीजस्य तु चन्द्रगतामृतलक्षकत्वमेव वाच्यं न पुनर्जलगतरसलक्षकत्वम्, असंबद्धलक्षणायामतिप्रसङ्गात्। न च व्योमवाचकस्यापि वाय्वादिगतशब्दलक्षकत्ववदुपपत्तिः, तत्रापि नभोगुणस्य व्यापकत्वेन स्वशक्यसमवेतव्याप्यत्वरूपसंबन्धस्य सत्त्वात्। अत एव 'प्रधानं तेजसो रूपं तद्बीजेन हि जन्यते' इत्यनेन वचनेन तेजोरूपस्य व्यापकत्वलक्षणं प्राधान्यं शक्यसंबन्धप्रदर्शनायैवोक्तम्। तन्न्यायस्य हकारादावपि तुल्यत्वेनादोषात्। न च तथाऽमृतव्याप्यत्वं जलरसस्य संभवति, तदभाववद्वृत्तित्वादिति चेत्—मैवम्, अमृते

[1] व्योमजन्यशब्दलक्षणा,

ऽपि रसस्य समवेतत्वेन लक्षणोपपत्तेः । अत एवोक्तम् 'संबन्धो विदितो लोके रसस्याप्यमृतस्य च' इति । अमृतरसयोराश्रयाश्रयिभावलक्षणोऽभेदलक्षणो वा संबन्धो लोकप्रसिद्ध इति न लक्षणायां विवदितव्यमित्यर्थः । शक्यताऽवच्छेदकेऽपि शक्तिरिति पक्षे रसामृतयोरभेदस्य लोकसिद्धत्वाद्रसाभिन्नामृतवति शक्तस्य सकारस्य रसोऽपि शक्यताऽवच्छेदक इति भावः । हादिविद्यापक्षपातिनस्तु, 'चन्द्रबीजैः' इति बहुवचनस्य स्वानुगुणत्वं मत्वा तुष्यन्तस्त्रिभिः सकारै रसा लक्ष्यन्त इति व्याख्याय ; ननु रसस्य द्वैविध्यात्तृतीयसकारः किमर्थ इत्याशङ्क्य ; अमृतं गतोऽप्येको रसोऽस्तीति तल्लक्षकत्वेनोद्ग्रन्थमेव समाधाय ; नन्वेवं सति तृतीयरसाधारत्वेन भूजलभेदात्षष्ठमहाभूतस्याप्त्तिरित्याशङ्कायाम् 'संबन्धो विदितः' इति ग्रन्थमवतार्य ; जलामृतयोः संबन्धो हि लोकप्रसिद्धः, तस्य जलनिधावेवोत्पन्नत्वात्, अतो जल एवान्तर्भाव इत्याशयपरत्वेन व्याचक्षते । तेषां रसस्येति पदस्य जलनिधौ लक्षणा, स्थूलसूक्ष्मपदाभ्यां प्रत्येकैकत्ववत्त्वेन लब्धद्वित्वविरोधश्च, जलेऽन्तर्भावे सिद्धे पुनर्वैयर्थ्यतादवस्थ्यं च । प्रत्युत जलामृतयोरभेदात्प्रातिस्विकममृतवाचकः सकारो नापेक्षित इत्येवार्थः संभवतीति । एवं लकारस्य गन्धबोधकत्वम् 'वसुंधरागतो[1] गन्धस्तल्लिपिर्गन्धवाचिका' इति वचनात् ॥ ७५ ॥

These Guṇa-s originate from the Varṇa-s and are of the same number as the latter, their progenitors. The four Spars'a-s originate from the three Kāma-kalā-s and the third *Īkara*. (75)

[1] वसुंधरागुणो,

नन्वेकेनैव लकारेणैकविधगन्धबोधोपपत्तेरितरद्वयवैयर्थ्यम्; अत आह—

भुवनत्रयसंबन्धादासीत्त्रेधा लकारोऽपि ।
ये ये यद्यज्जनकास्तेषां तेषां त एवार्थाः ॥ ७६ ॥

भुवनत्रयेण सह वाच्यवाचकभावसंबन्धाल्लकारस्य त्रैविध्यं जन्यजनकभावसंबन्धाद्वा, 'भुवनत्रयसंबन्धात्त्रिधात्वं तु महेश्वरि' इति वचनात्। स्पष्टमन्यत् ॥ ७६ ॥

Lakāra occurs thrice (in the Mantra), as it has a bearing on the three worlds. The several letters respectively signify the several things which took their origin from them. (76)

इदानीं वायुजनकानामपि ककाराणामर्थान्तरमस्तीति पूर्वोक्तस्य 'ये ये यद्यज्जनकाः' इत्यस्यौत्सर्गिकत्य नियमस्यापवादमाह—

ककारत्रयवाच्यास्तु सकलाः प्रलयाकलाः ।
विज्ञानकेवलाश्चेति त्रिप्रकारा उपासकाः ॥ ७७ ॥

प्रमातारः साधकाः पशव इत्यादिपदाभिधेया उपासकास्त्रिविधाः—अधमा मध्यमा उत्तमाश्चेति । त एवाशुद्धमिश्रशुद्धपदैः सकलादिपदैश्च क्रमेण व्यवह्रियन्ते । तत्र भेदैकदृष्टयः शिवाहंभावभावनाहीनाः कर्मैकरताः प्रथमाः । सुपक्वमलकर्माणः 'चितिश्चैत्यं च चैतन्यं चेतनं द्वयकर्म च । जीवः कला शरीरं च सूक्ष्मं पुर्यष्टकं भवेत् ॥' इति श्लोकोक्तसूक्ष्मपुर्यष्टकसंबन्धशालिनः कर्मज्ञानमार्गयोः साधारणा द्वितीयाः । निरस्तभेदाः सर्वत्र

शिवैकदृष्टयः पूर्णज्ञानिनस्तृतीयाः । एते च स्वच्छन्दसंग्रहे विस्तरेण प्रपञ्चिताः । ते त्रयाणां ककाराणां वाच्याः । तदुक्तम्—'अशुद्धशुद्धमिश्राणां प्रमातॄणां परं वपुः । क्रोधीशत्रितयेनास्य[1] विद्यास्थेन प्रकाश्यते ॥' इति । क्रोधीशः ककारः । न चाकाराणां पार्थक्यस्याग्रे वक्ष्यमाणत्वेनैकैकहलात्मका एव हकारककारादयो वाचका वक्तव्याः, तथा च ककारे जश्भावेन गत्वापत्तिरिति वाच्यम् ; एकहल एव पदत्वेन पदान्तत्वाभावात् व्यपदेशिवद्भावस्य 'टकितौ,' सुप्पितौ' इत्यादिज्ञापकेनानित्यत्वात् ॥७७॥

The three kinds of Upāsaka-s (pupils), known as Sakala-s, Pralayākala-s and Vijñāna-kevala-s, are signified by the three *Ka-kāra*-s (of the Mantra). (77)

अकारैर्दशसंख्याकैरुच्यन्ते जीवराशयः ।
विद्यायाः प्राणभूतः संस्तद्वाच्येकादशः स्वरः ॥ ७८ ॥

पञ्चदश्यां द्वितीयतृतीयवर्णौ हृल्लेखात्रयं च मुक्त्वाऽवशिष्टेषु दशस्वक्षरेष्वकारा दश । तेषां जीवराशय एव वाच्याः । एकेनाप्यभिधानसंभवे दशभिरभिधानं जीवानामानन्त्यद्योतनाय । तृतीयकूटाद्याकारे तु ध्वनिस्वरूपस्यैव भावार्थप्रकरणे मूलबीजांशरूपत्वमुक्तमिति न विरोधः । एकादशः स्वर एकारः । स च विद्यालक्षणस्य मूलबीजोत्थवृक्षस्यान्तरः प्राणः सन्नपि स्वयं स्ववाची, लोकेऽपि क्षतस्य पुनः प्ररोहणादिनाऽनुमीयमानस्याध्यात्मिकवायुसंबन्धस्य वृक्षादावङ्गीकारात् । उक्तं च—'श्रीकण्ठदशकं तद्वदव्यक्तस्य हि वाचकम् । प्राणभूतः स्थितो देवि तद्वदेकादशः स्वरः । एकः सन्नेव पुरुषो बहुधा जायते हि सः' इति । श्रीकण्ठा अकाराः ।

[1] ०त्रितयेनात्र.

अव्यक्तो जीवः॰। एकादश एकारः, 'संधिरेकादशो भद्रा पद्मनाभः कुलाचलः' इति कोशात, 'यदेकादशमाधारं बीजं कोणत्रयात्मकम्। ब्रह्माण्डादि कटाहान्तं जगत' इति प्रयोगाच्च योगरूढोऽयं शब्दः। तस्य च शुद्धयोगापेक्षया परत्वमस्त्येव। स च प्रकृत एकोऽपि दृश्यमानो बहुरूपः परिणमते। उक्तं च कादिमते—'यदेकादशमाधारं बीजं कोणत्रयात्मकम्। ब्रह्माण्डादि कटाहान्तं जगदद्यापि दृश्यते॥' इति। हादिपक्षे तु शुद्धयौगिकत्वमङ्गीकृत्य श्रीकण्ठपरत्वेनैकादशपदं व्याख्याय परो द्वादशः पुरुषः परः शिवः, तद्वाचक इति व्याचक्षते। तक्लिष्टमिति स्वर इति विशेष्येणाकारव्यावर्तकेन सूचितम्। ननु श्रीकण्ठदशकस्यैकस्मिन्नेव श्लोके प्रतिसंबन्धित्वेन निर्दिष्टस्योपस्थित्या, एकादशोऽपि श्रीकण्ठ एवेति चेन्न, रूढिप्राबल्ये तादृशोपस्थितेरप्रयोजकत्वात्। कथमन्यथा ज्ञानार्णवे 'आद्यं वाग्भवमुच्चार्य कामबीजं द्वितीयकम्। कुमार्यास्तु तृतीयं तु त्रिपुरा परमेश्वरी॥' इति त्रिपुराचक्रेश्वरीमन्त्रोद्धारः संगच्छताम्? तत्र हि कुमार्याः प्रतिसंबन्धित्वेन निर्देशेऽप्याद्यद्वितीयपदाभ्यां मातृकासंबन्धिनावेव प्रथमद्वितीयौ वर्णौ विवक्षितौ, दक्षिणामूर्तिसंहिताऽऽदौ 'अं आं सौः' इत्यस्यैव प्रथमचक्रेश्वरीमन्त्रस्योद्धृतत्वात्। अन्यथा बालाया एव त्रिपुराचक्रेश्वरीत्वमापद्येत। तस्मान्मातृकायामेकादश एवात्र ग्राह्य इति। तार्तीयप्रथमस्य पूर्वमभिहितत्वान्नेह पुनरुद्दङ्कनमित्यपि हादिपक्षे सुवचम्। परं तु न तथा सांप्रदायिकैर्व्याख्यातम्। तथाऽपि कः प्राणवाचकोऽकारः को वा जीववाचक इत्यनिर्धारणं तत्पक्षे दुरुद्धरम॥ ७८॥

The several species of Jīva-s are denoted by the ten *a-kāra-s*. The eleventh vowel (*viz.*, *E*), being the very life of the Vidyā, denotes life itself. (78)

योगिनीहृदयस्थमेव पद्यं लाघवात्स्पष्टत्वाच्च निबध्नाति—

बिन्दुभिस्त्रिभिरुच्यन्ते रुद्रेश्वरसदाशिवाः ।
शान्तिः शक्तिश्च शंभुश्च नादत्रितयबोधनाः ॥ ७९ ॥

रुद्रस्तेजस्तत्त्वम्, 'रुद्रो वा एष यदग्निः' इति श्रुतेः । तेन पुरुषनियतिकालरागविद्याकलामायानां परिग्रहः, 'पुरुषादिकमायाऽन्तं तेजस्तत्त्वं महेश्वरि' इति स्वच्छन्दसंग्रहोक्तेः । शान्तिः प्रकृतिः शुद्धविद्या च । अर्धचन्द्राद्युन्मनाऽन्तवर्णाष्टकं नादपदेनोच्यते । नादत्रितयमेव बोधनं येषां ते । करणे ल्युट् ॥ ७९ ॥

Rudra, Īs'vara and Sadā-s'iva are indicated by the three Bindu-s. S'ānti, S'akti and S'aṃbhu have for their index three Nāda-s. (79)

एवं सप्तत्रिंशत्संख्याकपदैर्महाविद्या ।
षट्त्रिंशत्तत्त्वानां तत्त्वातीतस्य चाभिधात्रीयम् ॥ ८० ॥

एवमित्युस्यानन्तरोदीरितश्लोकषट्कोक्तरीत्येत्यर्थः । तत्र हि व्योमबीजपञ्चकम्, कामकलाश्चतस्रः, चन्द्रबीजे द्वे, रेफभूबीजक्रोधीशबिन्दुनादास्त्रयस्त्रयः, श्रीकण्ठदशकम्, एकादशः स्वर एकः, इति संहृत्य सप्तत्रिंशत्पदान्युपपादितानि । तेषां च तत्त्वानि षट्त्रिंशत्तत्त्वातीतं ब्रह्मैकमित्यर्थः । तानि च यथा—शिवः, शक्तिः, सदाशिवः, ईश्वरः, शुद्धविद्या, माया, कला, विद्या, रागः, कालः, नियतिः, पुरुषः, प्रकृतिः, अहंकारः, बुद्धिः, मनः, श्रोत्रम्, त्वक्, चक्षुः, जिह्वा, घ्राणम्, वाक्, पाणिः, पादः, पायुः,

उपस्थः, शब्दः, स्पर्शः, रूपम्, रसः, गन्धः, आकाशः, वायुः, तेजः, आपः, पृथिवी। एतेषां स्वरूपमुत्पत्तिक्रमश्च सौभाग्यसुधोदये द्रष्टव्यः, विस्तरभयान्नेह लिख्यते। तत्र शिवशक्तिशुद्धविद्याप्रकृतयो बिन्द्वर्थाः। सदाशिवादिपुरुषान्ता नव नादार्थाः। शब्दादय आकाशादयः श्रोत्रादयो वागादयश्च पञ्च पञ्च हकारादेरर्थाः। अहंकारादित्रयं तु ककारत्रयस्य श्रीकण्ठानां वाऽर्थः। एकादशस्वरस्य तत्त्वातीतमर्थ इति विवेकः। यद्यपि हकारादेः शब्दाद्यर्थकत्ववदिन्द्रियाद्यर्थकत्वं नोक्तम्, तथाऽपि 'स्वरव्यञ्जनभेदेन सप्तत्रिंशत्प्रभेदिनी। सप्तत्रिंशत्प्रभेदेन षट्त्रिंशत्तत्त्वरूपिणी। तत्त्वातीतस्वभावा च विद्यैषा भाव्यते मया॥' इति वचनबलात्तत्तदर्थकत्वमवश्यकल्पनीयम्। न च सप्तत्रिंशतो वर्णानां सप्तत्रिंशति तत्त्वेषु क्रमेण शक्तिरस्त्विति वाच्यम्, हकारादौ क्लृप्तशक्तिपरित्यागस्य शक्त्यन्तरस्वीकारस्य चापत्तेः। न च भवत्पक्षेऽप्येकस्यानेकार्थकत्वं दोष इति वाच्यम्, एकत्र शक्तिः परत्र लक्षणेति सुवचत्वात्। न च युगपद्वृत्तिद्वयविरोधः, एतद्वचनबलादेव सप्तत्रिंशत्त्वस्य शक्तताऽवच्छेदकत्वाङ्गीकारेण पूर्ववत्तस्यादोषत्वात्, केवलहकारस्यैव व्योमवाचकत्वादिना प्रमितत्वेन तद्विरोधस्योद्भावने तु वृत्तिद्वयविरोधेऽकिंचित्करत्वस्य सुवचत्वाच्च; प्रमाणप्रमितत्वाविशेषादापततोऽनेकार्थत्वस्यापि हर्यादिपदवददोषत्वाच्च। क्लृप्तशक्तिपरित्यागस्तु न सर्वथा प्रामाणिकः। ननु प्रथमेंऽशे विद्यायामष्टपञ्चाशद्वर्णा उक्ताः, कथमिह सप्तत्रिंशत्त्वेन गण्यन्त इति चेत्, सत्यम्। न पुनरत्र वर्णगतेयं संख्या कण्ठरवेणोक्तवचने श्रूयते येनैवमुच्येत। श्रूयमाणं संख्यामात्रं तु पदनिष्ठत्वेनाप्युपपन्नम्, अर्धचन्द्रादिवर्णाष्टकस्यैकपदत्वात्, चतुरवयवककामकलावन्नादस्याष्टावयवकैकवर्णत्वाङ्गीकारेऽपि क्षतिविरहाच्च। अत एव त्रैपुरमन्त्रे समूहमूलकारणभूते महामेरावर्धचन्द्रादीनामष्टानामप्यर्धचन्द्रत्वरूपैकवर्णात्मक-

त्वमङ्गीकृत्य 'नवाक्षरो महामेरुरयं ब्रह्माण्डगोलकः' इत्यादिव्यवहारस्तन्त्रेषु दृश्यते। वस्तुतोऽर्धचन्द्रादेः स्थानस्वरूपादिभेदान्नैकवर्णत्वं युक्तम्, कामकलाऽवयवेषु तु न तथेति वैषम्यम्। अत एव मूले पदैरित्युक्तम्। 'शक्तं पदम्' इति तल्लक्षणाच्छक्तैरित्यर्थः। न च 'सुप्तिङन्तं पदम्' इति पाणिनीयसूत्रात् 'ते विभक्त्यन्ताः पदम्' इति न्यायसूत्राच्च 'शक्तं पदम्' इत्याधुनिकपरिकल्पितपरिभाषाया अप्रमाणत्वादिह पदत्वं न युज्यत इति वाच्यम्, तथाऽप्यर्थवत्त्वेन प्रत्यक्षरं प्रातिपदिकसंज्ञायां सुबुत्पत्तेः, [1]क्वचिद्व्यत्ययथादिना क्वचिच्छाकल्यमतेन क्वचित् 'सुपां सुलुक्—' इत्यनेन च लोपस्वीकारात्। न चैवं ककारेषु जश्त्वापत्तिः, 'किति,' 'पिति' इत्यादिज्ञापकैरेकाक्षरपदे तदनित्यताया ज्ञापनादिति। 'स्वरव्यञ्जनभेदेन' इत्यस्यायमर्थः—स्वरव्यञ्जनयोरभेदविवक्षामपवदितुं भेदेनेत्युक्तम्। अभेदे विवक्षित एव हि तयोरङ्गाङ्गिभावो लोकसिद्धः। तथा हि—व्यञ्जनानि तावत्स्वराङ्गाणि। तत्र ककारसकारहकारलकारा दशसंख्याकास्तु स्वस्वाव्यवहितोत्तरक्षणोच्चार्यमाणश्रीकण्ठानामङ्गानि। हृल्लेखाऽऽद्यहकारास्तु स्वस्वपूर्वोच्चार्यमाणलकारीयश्रीकण्ठानामेवाङ्गानीति यद्यपि 'संयोगादि' (प्रा० २१-४) इति सूत्रेण प्रतिभाति; तथाऽपि 'नान्तस्थापरमसवर्णम्' (प्रा० २१-७) इति सूत्रेण परेषामेवाङ्गानीति वाच्यम्। रेफास्तु सबिन्दुककामकलानाम्, अनुस्वारा अपि तासामेवेति वस्तुस्थितिः। तदेतत्सर्वं याजुर्वैदिकप्रातिशाख्यसूत्राणि त्रिभाष्यरत्नादितद्व्याख्यानानि च जानानानां स्पष्टतरम्। प्रकृते त्वियान्विशेषः। बिन्दवो हि स्वोत्तरोच्चार्यमाणनादाख्यस्वरस्यैवाङ्गानि न पुनः कामकलानाम्, 'तत्परस्वरम्, (प्रा० २१-२) इति प्रातिशाख्यसूत्रस्यात्र प्रवृत्तेः। यो हि स्वरात्पूर्वमनुस्वारो नोच्चार्यते

[1] क्वचिद्व्यत्ययादिना.

स एव स्वपूर्वस्वराङ्गमिति 'अनुस्वारः—' (प्रा० २१-६) इति सूत्रस्य विषयः। न हि लोकवेदयोः क्वापि संहितायामनुस्वारोत्तरं स्वरोच्चारणं दृश्यते। मकारनकारयोर्हि सतोर्हलि झलि च परेऽनुस्वारविधिः 'मोऽनुस्वारः,' (८-३-२३) 'नश्चापदान्तस्य झलि' (८-३-२४) इति पाणिनीयसूत्रयोरुपलभ्यते। तस्य च ययि परे परसवर्णवर्णान्तरताऽऽपत्तिविधानाच्छषसहाख्यरांहुकूटे 'हंसः' इत्यादावात्मलाभ इत्याशयेन वेदमात्रमधिकृत्य प्रवृत्तेन प्रातिशाख्यमुनिनाऽनुस्वारमात्रस्य पूर्वाङ्गत्वम् 'अनुस्वारः—' (प्रा० २१-६) इति सूत्रेणोक्तम्। तस्य च 'व्यञ्जनमपराङ्गं विरामे लुप्यते' इत्यादिसामवेदीयफुल्लसूत्राद्युक्तानि सामविशेषेषु प्रयोजनानि विस्तरभयादनुपयोगाच्च नेहोल्लिखितानि। न चात्रापि प्रथमद्वितीयकूटस्थानुस्वारयोर्हकारसकारपूर्वत्वेन परसवर्णादिवर्णान्तरभावाभावात्पूर्वाङ्गताऽऽपत्तिरिति वाच्यम्, कूटानां पार्थक्येनोच्चारणे स्वरपरत्वान्मिलित्वोच्चारणे तु बिन्द्वादिनवकस्योत्तरकूटे प्रवेशविधानेन हकारादिपूर्वत्वाभावात्। वस्तुतस्तु, हल्त्वमेव हि व्यञ्जनत्वम्। कथमन्यथा 'हलोऽनन्तराः संयोगः' (१-१-७) इति सूत्रोक्ता संयोगसंज्ञा 'हंसः' इति सकारे स्यात्? तदभावे च हकारीयाकारे 'संयोगे गुरु' (१-४-११) इति सूत्रेण गुरुसंज्ञा न सिध्येत्। इष्टा हि सा। तदेतच्छन्दःशास्त्रीये 'प्रादिपरः' इति पिङ्गलसूत्रे च्छन्दोभास्करे प्रपञ्चितमस्माभिः। तथा च 'संयोगादि' (प्रा० २१-४) इति प्रातिशाख्यसूत्रेण संयुक्ताक्षरादिमव्यञ्जनस्य पूर्वाङ्गत्वं विदधतैव चारितार्थ्यात् 'अनुस्वारः-' (प्रा० २१-६) इति पृथग्योगो व्यर्थः। न ह्यवसाने स्वरे वा परे लोकवेदयोरनुस्वारः क्वापि दृश्यते, येन तत्सार्थक्यं भवेत्। तस्मात्पृथक्सूत्रकरणस्य श्रीविद्याऽनुस्वार एव विषय इत्यवश्यं वक्तव्यम्। तेन च कामकलानामेव बिन्दवोऽङ्गानि, नादस्तु द्वितीयतृतीयस्वरवदव्यञ्ज-

नाङ्गक एव स्वरो भविष्यतीति दिक् । अयं चाङ्गाङ्गिभावः ' चतुर्विंशत्यक्षरा गायत्री ' इत्यादौ वेदे लौकिकच्छन्दःसु प्रकृतेऽपि पञ्चदशत्वषोडशत्वाद्युपपत्त्यर्थमुपयुज्यते, अङ्गाङ्गिनोरभेदविवक्षया तदभिन्नप्रधानाक्षरगणनयैव संख्यापूर्तेरावश्यिकत्वादिति वस्तुस्थितिः । तदपवादाय ' स्वरव्यञ्जनभेदेन ' इत्युक्तम् । अङ्गाङ्गिनोर्भेद एव प्रकृतार्थे कार्यो न पुनरभेदो विवक्षणीय इत्यर्थः । हादिविद्यायां हि द्वितीयतृतीयाक्षरयोरपि सव्यञ्जनकत्वेन षष्टिरक्षराणि । अर्धचन्द्रादेरेकवर्णत्वाङ्गीकारेऽपि तावदेकोनचत्वारिंशत् । बिन्दूनामपि नादेषु मेलनेनैकवर्णत्वस्वीकारे तु षट्त्रिंशत् । शक्तानि तु तत्र चत्वारिंशत्, व्योमबीजषट्कं मायात्रयं कारणबिन्दुरेको रेफचन्द्रबीजभूबीजक्रोधीशबिन्दुनादानां त्रयं त्रयं द्वादश श्रीकण्ठा इत्येव तदर्थोपपादनादिति न कथंचन सप्तत्रिंशत्ता संपद्यते । यद्यपि स्वराः पञ्चदश व्यञ्जनान्यष्टादश बिन्दवस्त्रयः सर्ववर्णसमष्टिरेकेति सप्तत्रिंशत्ता तदुपासकैरुपपाद्यते, यदुक्तं कामकलाविलासे—' अज्व्यञ्जनबिन्दुत्रयसमष्टिभेदैर्विभाविताकारा । षट्त्रिंशत्तत्त्वात्मा तत्त्वातीता च केवला विद्या ॥ ' इति; तथाऽपि संख्यायाः पृथङ्निवेशित्वस्वाभाव्येन व्यष्टिवेषेण गणितस्य पुनर्गणनं गौणम्, पञ्चदश्यां षोडशीत्वापादकं च । किं च, अङ्गाङ्गिनोरभेदस्य लोकसिद्धस्यापवादाय भेदेनेति कण्ठरवेणोक्तेर्लोकसिद्धभेदानां पञ्चदशानां वर्णानामभेदेन गणनस्य कुतो लाभ इति विचार्यम् । यद्यपि भेदपदस्य ' संभेदः सिन्धुसंगमः ' इत्यादौ संगमार्थे प्रसिद्धत्वादिह स्वरव्यञ्जनानां सर्वेषां मेलनेनेत्यप्यर्थः सुवचः; तथाऽपि भेदपदस्य वृत्तिक्लेशः, समित्यनुपसृष्टस्य तादृशार्थावाचकत्वं च । किं च, यथा तावत् ' व्याप्ता पञ्चदशार्णैः सा ' इत्यनेन सामान्यतः पञ्चदशसंख्याकाक्षरकत्वमुक्त्वा तदुपपादनाय तदग्रिमग्रन्थे ' पञ्चभिश्च तथा षड्भिः ' इति

विशिष्य कथनम्, *तथैव* '*स्वरव्यञ्जनभेदेन सप्तत्रिंशत्प्रभेदिनी*' *इत्यादिना सामान्येन सप्तत्रिंशत्संख्याकाक्षरकत्वं प्रतिज्ञाय तदग्रिमग्रन्थेन* '*व्योमबीजैस्तु* विद्यास्थैः' इत्यादिना 'नादत्रितयबोधनाः' इत्यन्तेन विविच्य तदुपपादनमित्यविवादम् । तत्र चोक्तरीत्या चत्वारिंशतोऽप्युपपादनादुपक्रमोपसंहारविरोधो दुरुद्धरः। किं च, 'बिन्दुभिस्त्रिभिरुच्यन्ते रुद्रेश्वरसदाशिवाः। शान्तिः शक्तिश्च शंभुश्च नादत्रितयबोधनाः ॥' इत्येकस्मिन्नेव श्लोके बिन्दुत्रयनादत्रययोरर्थवर्णनेन बिन्दुत्रयस्य सप्तत्रिंशत्संख्यापूर्त्यर्थमुल्लेखो नादत्रयस्य तु त्याग इत्यत्र तु स्पष्टं पक्षपात एव मूलमिति । एतेन कादिविद्यायां सप्तत्रिंशत्त्वसिद्ध्यर्थं द्वितीयतृतीयाक्षरयोः संध्यक्षरत्वात्प्रातिस्विकं द्व्यात्मकत्वेन गणनाक्लेशः प्राचामपास्तः; हृल्लेखास्वपि तथाऽऽपत्त्या [1]प्रकृतबाधकापादकश्च । तस्मान्नादत्रयमेलनेनैव सप्तत्रिंशत्ता । स्पष्टमेतद्योगिनीहृदये 'हृल्लेखात्रयसंभूतैस्तिथिसंख्यैस्तथाऽक्षरैः' इत्यसकृत्प्रतिहृल्लेखं पञ्चानामक्षराणां गणनात् । तस्माद्योगिनीहृदये संप्रदायार्थप्रकरणं सर्वं कादिविद्यायामेव स्वरसमिति निष्पक्षपातं कृतमतयो विदांकुर्वन्तु । अयमत्र निष्कर्षः—तत्तदक्षरैर्वाच्याँल्लक्ष्यांश्च पदार्थानुद्दिश्यैकादशस्वरेण तत्त्वातीतब्रह्माभेदो विधीयते । एवं विद्याऽवयवाक्षरसमूहवाच्यपदार्थसमुदायात्मकत्वात् 'विश्वं विद्याऽभिन्नम्' इत्यपि विधीयते । भावार्थे हि शिवशक्तिजन्यत्वज्ञाप्यकशिवशक्त्यभेदविधेयको विद्याजगदुभयोद्देश्यक एको बोधः। विश्वजनकजन्यत्वज्ञाप्यकविश्वाभेदविधेयको विद्योद्देश्यकश्चैकः । इह तु विद्योद्देश्यको विश्वान्तर्गतयावत्पदार्थप्रातिस्विकवाचकाक्षरैकघटितत्वज्ञाप्यकविश्वाभेदविधेयक एकः, विश्वोद्देश्यकविद्याऽभेदविधेयकश्चान्यो बोध इति भेदः ॥ ८० ॥

[1] प्रत्युत बाधका०

Thus, by the Pada-s (words) thirty-seven in number, this Mahā-vidyā severally denotes the thirty-six Tattva-s and the (thirty-seventh) one which transcends them. (80)

तदेतदभिसंधायाह—

जन्यजनकयोर्भेदाभावाद्वाच्यस्य वाचकेनापि ।
ब्रह्मणि जगतो जगति च विद्याऽभेदस्तु संप्रदायार्थः॥८१॥

ब्रह्मणि जगत इत्यत्र, अभेद इति शेषः । सम्यग्गुरुशिष्यपारंपर्य-क्रमायातमर्यादाऽनुसारेण दीयत इति संप्रदायार्थः ॥ ८१ ॥

As there is no difference between the cause and its effect, between the Vācya (the thing signified) and its Vācaka (the word which signifies the thing), and between *Brahman* and the Universe, so also the Universe and this Vidyā are identically related to each other. This is *Sampradāyārtha*. (81)

अथ निगर्भार्थमाह—

परमशिवे निष्कलता तदभिन्नत्वं स्वदेशिकेन्द्रस्य ।
तत्करुणातः स्वस्मिन्नपि तदभेदो निगर्भार्थः ॥ ८२ ॥

परमशिवः कामकलास्वरूपनिर्णयावसरे निष्कृष्य कथितं ब्रह्म । तत्र निष्कलता तदितरपदार्थाभावः, तदितरस्य सर्वस्यापि दुःखजनकत्वात्, 'द्वितीयाद्वै भयं भवति' इति श्रुतेः । इति प्रथमकूटार्थः । तेन

ब्रह्मणा स्वीयस्य देशिकेन्द्रस्य श्रीगुरुचरणानाममेदः, तेषां ब्रह्माभेदभावनादार्ढ्येन तदभेदस्य सिद्धत्वादिति द्वितीयकूटार्थः। तत्करुणातः स्वकृताव्यभिचरितभक्तिपुरःसरदृढतरसेवासंपादितप्रसादजन्यगुरुकरुणाकरम्बितकटाक्ष - निरीक्षणबलात्स्वस्मिन्नपि साधके ब्रह्माभेदः सिध्यतीति तृतीयकूटार्थः। स्वस्य गुरुद्वारा शिवगर्भे प्रवेशसंपादकत्वादेतज्ज्ञानस्य विषयः शिवगुर्वात्मैक्यं निगर्भार्थपदवाच्यम् ॥ ८२ ॥

Flawlessness (non-admixture with other things) in Parama-s'iva (the Supreme Being), the identity of one's Des'ikendra (revered Guru) with that (Supreme Being) and, through his (Guru's) grace, of one's self with that (Supreme Being); this is the *Nigarbhārtha*. (82)

अथ परदेवताया विद्यायाश्चक्रराजस्य श्रीगुरोरात्मनश्चैक्यं कौलिकार्थ इत्युच्यते, सर्वेषां ब्रह्माभेदेन सजातीयत्वात्, सजातीययूथस्य कुलपदवाच्यत्वात्, 'सजातीयैः कुलं यूथम्' इत्यमरोक्तेः। अयं च पञ्चानामभेदः समानधर्मवत्त्वेन सिषाधयिषितः। स च समानो धर्मः 'गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम्। देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीम् ॥' इति तन्त्रराजोक्तगणेशादिषट्कात्मकत्वाख्यः। तत्र परदेवतायां प्रथमं गणेशत्वमुपपादयति—

माता निरुपमतेजोमय्याः स्वस्या मरीचिरूपाणाम् ।
आवरणदेवतानामीशत्वादुच्यते गणेशीति ॥ ८३ ॥

'न तत्र सूर्यो भाति' इत्यादिश्रुत्या प्रतिपादितानवधिकतेजोरूपब्रह्मणो मरीचय एवावरणदेवताः। ताश्चैकादशोत्तरशतसंख्याकाः।

तन्त्रभेदेनान्या अपि प्रतिपादिताः । तादृशदेवतागणस्येशत्वाद्गणेशीत्युच्यते माता ॥ ८३ ॥

'Mātā' (the Mother) being the presiding Deity of the (Gaṇa of) Āvaraṇa-devatā-s (subsidiary deities surrounding Her) in the form of rays of incomparable brilliance of Hers, is known as Gaṇes'ī. (83)

इच्छाऽऽदित्रिसमष्टिर्गुणत्रयाढ्याऽनलेन्दुरविनेत्रा ।
एवं नवभिर्योगाद् ग्रहरूपेत्युच्यते माता ॥ ८४ ॥

इच्छा ज्ञाना क्रियेति शक्तित्रयसमष्टिरूपा माता । तदुक्तं संकेतपद्धतौ—"इच्छा शिरःप्रदेशेऽथ ज्ञाना च तदधोगता । क्रिया पदगता ह्यस्याः' इति । गुणविशिष्टस्य शबलब्रह्मणोऽवयवरूपा एव गुणा इति व्यवह्रियन्ते । आदित्यादिग्रहाणां नवसंख्याकत्वान्नवसंख्याकावयवशालित्वमेव प्रकृते ग्रहत्वं विवक्षितम् । एवमेव नक्षत्रादिषु बोद्धव्यम् ॥ ८४ ॥

The Mother, the aggregate of the three S'akti-s, Icchā and others, having the three Guṇa-s and with Anala (the fire), Indu (the moon), and Ravi (the sun) as her three eyes, thus composed of the (above) nine, is known as Graha-rūpā (assuming the form of the nine Planets). (84)

इन्द्रियदशकेनान्तःकरणचतुष्केण विषयदशकेन ।
प्रकृतिपुरुषगुणतत्त्वैर्जाता नक्षत्ररूपिणी माता ॥ ८५ ॥

ज्ञानेन्द्रियाणि श्रोत्रादीनि पञ्च, कर्मेन्द्रियाणि वागादीनि पञ्चेति दशेन्द्रियाणि, मनो बुद्धिरहंकारश्चित्तं चेत्यन्तःकरणचतुष्कम्, शब्दादयो वचनादयश्च विषया दश । प्रकृतिगुणत्रयसाम्यावस्था, पुरुषः, सत्त्वादि-गुणत्रयसमष्टिरूपं सुखदुःखमोहमूलं गुणतत्त्वम् । एवं सप्तविंशतिसंख्या-कत्वान्नक्षत्ररूपत्वं मातुः ॥ ८५ ॥

The Mother becomes Nakṣatra-rūpiṇī, assuming as she does the twenty-seven forms denoted by the ten Indriya-s, the four Antaḥ-karaṇa-s, the ten Viṣaya-s (the objects of senses), Prakṛti, Puruṣa and Guṇa-tattva. (85)

नरपतिरविकाष्ठाषट्समुद्रद्विसंख्यै-
रकडबवहपूर्वैरक्षरैर्वेष्टिताभिः ।
डरलकसहवर्णाद्याकिनीभिस्तु षड्भि-
र्घटिततनुरितीयं कथ्यते योगिनीति ॥ ८६ ॥

नरपतयो राजानः षोडश । रवयो द्वादश । काष्ठा दिशो दश, ऊर्ध्वाधोदिग्द्वयस्याप्यष्टभिर्दिग्भिः साहित्यात् । समुद्राश्चत्वारः, 'पयोधरी-भूतचतुःसमुद्राम्' इत्यादौ तथैव समुद्रगतसंख्याप्रसिद्धेः । षोडशादिसंख्या-नामकाराद्यक्षरैर्यथासंख्यमन्वयः । अकाराद्याः षोडश स्वरा अमृताऽऽदि-तद्देवतोपलक्षकाः । कादिठान्ता द्वादश वर्णाः कालरात्र्यादीनामुपलक्षकाः । डादिफान्ता दश डामर्यादीनाम् । बादिलान्ताः षड् बन्धिन्यादीनाम् । वादिसान्ताश्चत्वारो वरदाऽऽदीनाम् । हक्षौ द्वौ हंसवतीक्षमावत्योरुपलक्षकौ । डकारादि वर्णषट्कमादिभूतं यासामाकिनीनां ता डाकिन्यादयः ।

तेनामृताऽऽद्यावृता डाकिनी, कालरात्र्याद्यावृता राकिनी, इति प्रकारेण षड्भिस्त्वगसृङ्मांसमेदोऽस्थिमज्जाधिपतिभिर्विशुद्धचनाहतमणिपूरस्वाधिष्ठान-मूलाधाराज्ञाचक्राणां तत्तद्देवताऽऽवरणशक्तिसमानसंख्याकतत्तदीयदलनिविष्ट-तावत्तावत्संख्याकदेवीसंवृतानां कर्णिकासु निविष्टाभिर्डाकिनीराकिनीलाकिनी-काकिनीसाकिनीहाकिनीभिर्घटिता तनुर्यस्याः सा योगिनीत्युच्यत इत्यर्थः । यद्यपि 'त्वगसृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः' इति भिषजां घण्टा-घोषेण धातवः सप्त; तदधिपतिरपि याकिनीनाम्ना सहस्रारपद्मेऽमृताऽऽदि-सकलशक्तिबृन्दाधिष्ठितदलकिर्मीरिते तिष्ठतीति तन्त्रेषु प्रसिद्धम्, षोढान्यासे ऽपि क्वचित्तन्त्रेषु तस्या न्यासो दृश्यते; तथाऽपि योगिनीहृदये षण्णामेव न्यासविधानादमृताऽऽदिशक्त्यतिरिक्तशक्तेरावरणरूपाया अभावेनैतत्षट्क-समष्ट्यात्मकमातृत्वेन च पार्थक्याभावाद्योगिन्यः षडेव । यदाह — 'विशुद्धौ हृदये नाभौ स्वाधिष्ठाने च मूलके । आज्ञायां धातुनाथाश्च न्यस्तव्या डादि-देवताः । अमृताऽऽदियुताः सम्यग्ध्यातव्याश्च सुरेश्वरि ॥' इति ॥ ८६ ॥

(She) is styled Yoginī as her body is made up of the six Ākinī-s having *Ḍa*, *Ra*, *La*, *Ka*, *Sa* and *Ha* as their initial letters, surrounded respectively by the letters beginning with *A*, *Ka*, *Ḍa*, *Ba*, *Va* and *Ha*, which are respectively sixteen (indicated by the Saṃketa, Nara-pati), twelve (indicated by Ravi), ten (by Kāṣṭhā,, directions), six, four (by Samudra) and two in number. (86)

पञ्चभिर्नागकूर्माद्यैः प्राणापानादिपञ्चभिः ।
जीवात्मपरमात्मभ्यां चैषा राशिस्वरूपिणी ॥ ८७ ॥

आद्यादिपंदाभ्यां कृकरदेवदत्तधनंजयानां व्यानोदानसमानानां च संग्रहः। एवं द्वादशात्मकत्वाद्राशिरूपिणी जगन्माता। पीठानां गणेशादिसमानसंख्याकत्वात्तदात्मकत्वोक्त्यैव तदुक्तप्रायमिति न पुनः पृथक्संरम्भः॥

She is Rās'i-svarūpiṇī (assuming the form of the Zodiacal signs) being made up of the five beginning with Nāga and Kūrma, the five beginning with Prāṇa and Apāna, Jīvātman and Paramātman. (87)

अथ विद्यायां गणेशादिरूपत्वमुपपादयति—

अकथादिकषोडशाक्षरात्मकतार्तीयककामवाग्भवैः।
घटिता च पराऽऽदिवाग्गणैरिति विद्याऽपि गणेशरूपिणी॥

अकारादिषोडशस्वरात्मकं तार्तीयं शक्तिकूटम्। कादितान्ताक्षररूपं द्वैतीयीकं कामराजकूटम्। थकारादिसकारान्ताक्षरमयं प्राथमिकं वाग्भवकूटम्। पराऽऽदिवाक्चतुष्टयरूपं चैतद्व्यष्टिसमष्टिभेदेन। अतः शब्दगणस्येशत्वाच्छ्रीविद्याऽपि गणेशरूपा। वैतालीयं छन्दः॥ ८८॥

The Vidyā also is Gaṇes'a-rūpiṇī for the reason that she is composed of the sixteen letters each beginning with A, Ka and Tha of the third S'akti), the Kāma-rāja- and the Vāg-bhava- Kūṭa-s and the Vāg-gaṇa-s (word-groups) beginning with Parā. (88)

बिन्दुत्रयनादत्रयतदन्यकूटत्रयैर्ग्रहत्वमिह।
नक्षत्रत्वं च दशाकाराणां व्यञ्जनैरपार्थक्यात्॥ ८९॥

बिन्दुनादनिर्मुक्तं कूटमेकं बिन्दुरेको नाद एकः, एवं प्रतिकूटं त्रयं त्रयमित्यर्थः। तदुक्तम्--'बीजबिन्दुध्वनीनां च त्रिकूटेषु ग्रहात्मिका' इति। बिन्दवश्च ध्वनयश्चेति द्वंद्वोत्तरं बीजानां बिन्दुध्वनय इति तत्पुरुषात्। तेन च बीजबिन्दुध्वनीनामिति पदेन षड् गणिता भवन्ति। तेषां षण्णां त्रिकूटेषु; अर्थात्तदतिरिक्तेषु त्रिषु मेलनेनेति शेषः। षष्ठ्या वा संबन्धित्वमर्थः। तैः षड्भिः संमेल्य गणितेषु कूटेषु सत्सु ग्रहात्मिका विद्या भवतीति योजना। ये तु बीजपदेन हकाररेफेकारसमूहमात्रम्, तानि च बिन्दवश्च ध्वनयश्चेति त्रिपदद्वंद्व इति व्याख्याय [1]बीजमात्रेणावयवविश्लेषसचिवेन ग्रहत्वमुपपादयन्ति तेषामितरांशवैयर्थ्यम्, संपूर्णाया विद्याया एव गणेशनक्षत्राद्यात्मकत्वोक्त्या प्रकृते विद्यैकदेशस्यैव ग्रहत्वोपपादने क्वचिदेकदेशे क्वचित्संपूर्णायामिति वैरूप्यं च। यथा च योगिन्यादेरपि नैकदेशरूपताऽऽपत्तिस्तथाऽनुपदमेव वक्ष्यामः। किं च, बिन्दुनिर्मुक्तस्य बीजत्वाभावाद्बीजपदेन परामर्शोऽपि नोचितः। कथमन्यथा 'शुद्धं बिन्दुयुतम्' इत्यादिदशविधमातृकान्यासान्तर्गतशुद्धमातृकान्यासप्रकरणे बिन्दुविनिर्मोके सति केवलानामक्षराणां बीजत्वाभावापत्त्या बिन्दुयुतन्यासे पौनरुक्त्येऽपि सबिन्दुक एव शुद्धन्यासः कार्य इति सांप्रदायिकानामुक्तिः संगच्छत इति दिक्। संप्रदायार्थप्रकरणे सप्तत्रिंशद्वर्णा उक्ताः। तेषु दश श्रीकण्ठानां स्वस्वव्यञ्जनैः सह गणने दशसंख्याया बाधे सप्तविंशतिरवशिष्यन्ते; तेन च नक्षत्रात्मकत्वं सिद्धमित्याह--नक्षत्रत्वं चेति। तदुक्तम्--'हल्लेखात्रयसंभूतैस्तिथिसंख्यैस्तथाऽक्षरैः। अन्यैर्द्वादशभिर्वर्णैरेषा नक्षत्ररूपिणी॥' इति॥ ८९॥

[1] बीजत्रय०

Again (She) attains the form of the Graha-s in virtue of her being composed of the three Bindu-s, the three Nāda-s and the remaining portions of the three Kūṭa-s. Similarly she attains the form of the Nakṣatra-s, as She is composed of thirty-seven Akṣara-s, (the ten Akṣaras of which are inseparable from the twenty-seven consonants and therefore not to be taken into account). (89)

हृल्लेखाभिस्तिसृभिस्तदन्यकूटैश्च योगिनी योगात् ।
राशीभूताऽप्येषा तिसृणां पूर्वाक्षैरैक्यात् ॥ ९० ॥

हृल्लेखात्रयं तद्विनिर्मुक्तं कूटत्रयं चेति षड्भिर्योगादेषा विद्या योगिनी । तिसृणां हृल्लेखानां पूर्ववर्णैर्लकारैः सह गणनायां द्वादशसंख्याकावयवशालित्वाद्राशिरूपा अप्येषा । उक्तं च—'विद्याऽन्तर्भूतशक्त्याद्यैः शाक्तैः षड्भिरथाक्षरैः । योगिनीत्वं च विद्याया राशित्वं चान्त्यवर्जितैः ॥' इति । विद्याऽन्तर्भूता ये शक्तेराद्यभागाश्चतुःपञ्चत्र्यक्षररूपास्त्रयः, तैः शाक्तैः शक्तिभिः । स्वार्थे तद्धितः । साहित्यरूपसंबन्धार्थे वा । तिसृभिः शक्तिभिः सहितैः । तेन षट्संख्यामापन्नैरित्यर्थः । केचित्तु—शाक्तपदेन लकारास्त्रयः; तेषामेव शक्त्याद्यैरिति विशेषणम्; तच्च शक्तिसाहित्यद्योतनाय; तेन च षट्संख्यापूर्तिः; एवं च त्रिभिर्लकारैस्तिसृभिर्लज्जाभिश्चेत्यर्थः—इति व्याचक्षते । तेषां मते विद्यैकदेशस्यैव योगिनीरूपत्वात् 'योगिनीत्वं च विद्यायाः' इत्युक्तिस्वारस्यभङ्गापत्तिः. विद्यैकदेशे विद्यापदस्य लक्षणाऽऽपत्तेः । इदं तु चिन्त्यम्—शक्त्याद्या लकारास्त्रयः शाक्ताः सकारास्त्रय इति स्पष्टतरम्; हादिविद्यापक्ष एवास्य स्वारस्ये सत्यपि शक्तपदं

लकार्थकत्वेन किमिति व्याख्यातं तत्पक्षपातिभिरिति । 'अन्त्यवर्जितैः' इत्यस्यान्त्यानां मायानां पार्थक्येन गणनं वर्जनीयमित्यर्थः । अर्थात्संनिहितैर्लकारैर्मेलनेनेति भावः । ये तु यथाश्रुतं व्याचक्षते तेषाम् 'विद्यायाः' इति स्वारस्यं भज्येत । अथ वा, राशीनां सपादनक्षत्रद्वयात्मकत्वेन नक्षत्रत्वोक्त्यैव पूर्णविद्याया राशित्वं सिद्धम्; एकदेशेऽपि तदस्तीति विशेषद्योतनायान्त्यवर्जितैरित्युक्तिः ॥ ९० ॥

Further She is Yoginī as She is composed of the three Hṛl-lekhā-s and other Groups besides them. Also, She assumes the form of the Zodiacal signs, as She is composed of the nine letters of the three Hṛl-lekhā-s and the La-s which precede them. (90)

एवं गणेशादिषट्कत्वस्य विद्यायां देव्यभेदसाधकत्वे स्थितेऽपि विद्यायां देवीरूपान्तरत्वस्य वचनबलादेव सिद्धत्वेन रामकृष्णादिवदभेदस्यापि सिद्धत्वेनाभेदेनैव हेतुना षट्कत्वं साधयति—

देव्या रूपान्तरत्वेन विद्यायास्तदभेदतः ।
गणेशग्रहनक्षत्रयोगिनीराशिपीठता ॥ ९१ ॥

अथ, चक्रराजे गणेशादित्वमाह—

रेखादलकोणगणैर्घटनाच्चक्रे गणेशत्वम् ।
त्रैलोक्यमोहनाद्यैर्नवभिश्चक्रैर्ग्रहत्वं च ॥ ९२ ॥

रेखाश्चतुस्त्रास्तिस्रो वर्तुलास्तिस्रः । दलानि चतुर्विंशतिः । कोणाः पञ्चचत्वारिंशत् । त्रैलोक्येति । सर्वानन्दमयान्तैरिति शेषः । रेखाभिस्तिसृभिरकथादिमयीभिर्मध्यत्रिकोणमाभिर्गणेशत्वं वदतां चक्रैकदेशे तदापत्त्या वैरूप्यं दोषः ॥ ९२ ॥

As the Vidyā is of the same form as the Devī and is therefore identical (in quality) with Her, in respect to Gaṇes'a, Graha, Nakṣatra, Yoginī, Rās'i and Pīṭha, (there is complete identity between the Vidyā and the Devī). (91)

The (S'rī-vidyā) Cakra being composed of Gaṇā-s of Rekhā-s (lines), Dala-s (Petals) and Koṇa-s (angles), attains Gaṇes'a-tva (the quality of Gaṇes'a) and also Graha-tva (the quality of the Graha-s) being composed of the nine Cakra-s beginning from Trai-lokya-mohana. (92)

वृत्तत्रयधरणीत्रयमन्वश्राणां विभज्य गणनेन ।
सप्तभिरितरैश्चक्रैश्चक्रे नक्षत्ररूपत्वम् ॥ ९३ ॥

द्वयोः पद्मयोः कर्णिकावृत्ते द्वे, एकं बहिर्वृत्तमिति त्रयम् । धरणीत्रयं भूगृहरेखास्तिस्रः । मन्वश्राणि चतुर्दश कोणाः । इतरैः, त्रैलोक्यमोहनसर्वसौभाग्यदायकातिरिक्तैः । वृत्तत्रयमन्वश्रबहिर्दशारैरिति केचित् ॥ ९३ ॥

There is in the Cakra, Nakṣatra-rūpa-tva in virtue of its being composed of three Vṛtta-s (circles), three Bhū-gṛha-rekhā-s (lines), fourteen Koṇa-s (angles) and seven other Cakra-s got by counting by separation. (93)

स्थितिसंहृतिचक्रे द्वे पद्मे द्वे वृत्तभूगृहे च द्वे ।
एवं षड्भिर्योगाच्छ्रीचक्रं योगिनीरूपम् ॥ ९४ ॥

बिन्दुत्रिकोणवसुकोणाः संहृतिचक्रम्, दशारे द्वे चतुर्दशारं च स्थितिचक्रम्, अवशिष्टं सृष्टिचक्रमित्येतत्त्रिप्रकारकत्वं चक्रसंकेते स्पष्टम् । पद्मे वसुदलषोडशदले । वृत्तमेकं भूगृहत्वेनैकम् । अष्टभिः कोणैर्ब्राह्म्यादियोगिनीरूपत्वं वदतां त्वतिवैरूप्यम् ॥ ९४ ॥

The S'rī-cakra assumes the form of Yoginī, as the two Cakra-s representing Sthiti (Preservation) and Saṃhṛti (Destruction), the two Padma-s (lotuses) and two (others), Vṛtta and Bhū-gṛha go to compose it. (94)

पञ्चचतुःशक्त्यनला बिन्दुर्वृत्तं च भूबिम्बम् ।
एवं द्वादशसंख्यैर्घटनाच्चक्रस्य राशित्वम् ॥ ९५ ॥

स्वाभिमुखाग्रत्रिकोणानि शक्तय इत्युच्यन्ते । तानि पञ्च । पराङ्मुखाग्रत्रिकोणान्यनलाः । तानि चत्वारि । तदुक्तम्—'पञ्चशक्तिचतुर्वह्निसंयोगाच्चक्रसंभवः' इति । वृत्ते पद्मद्वयगर्भितम् । ये तु नव त्रिकोणानि द्वे पद्मे भूगृहमेकमित्याहुस्तेषां बिन्दुपरित्यागो दोषः ॥ ९५ ॥

There is, in the Cakra, Rās'i-tva (the form of the Zodiacal signs) as it contains five S'akti-s, four Fires, one Bindu, one Vṛtta and one Bhū-gṛha, thus twelve in all. (95)

चक्रस्य विद्याऽक्षरजन्यत्वादप्यभेदस्य सिद्धत्वात्तेन हेतुना षड्रूपत्वं द्रढयति—

चक्रं विद्याऽक्षरैरेव जननात्तदभेदवत् ।
देव्या रूपान्तरत्वाच्च तेन युक्तोक्तरूपता ॥ ९६ ॥

यद्यपि मूलतन्त्रे चक्रे विद्याया अभेदस्तदक्षरजन्यत्वज्ञाप्यक एवोक्तो न पुनः षड्रूपत्वज्ञाप्यकः, तथाऽपि 'एवं विश्वप्रथाऽऽकारा चक्ररूपा महेश्वरी' इत्युक्त्या षड्रूपता सूचितेति संप्रदायः ॥ ९६ ॥

The aforesaid forms have been aptly assigned to the Cakra, as it is composed of the Akṣara-s of the Vidyā and is but another form assumed by the Devī Herself.

एतेषां गणेशादीनां पञ्चानां मेलने पञ्चपञ्चाशत्संपद्यन्ते, गणेशस्यैकविधत्वेनैव गणनात्, रेखादलकोणेषु पञ्चसप्ततावपि 'एको गणेशः' इत्येव व्यवहारात् । पीठानि यद्यपि कामरूपादिच्छायच्छित्रान्तान्येकपञ्चाशत्, तथाऽपि 'ओजापूकानाम्' इति प्राधान्यवेषेण पुनर्गणनायां पञ्चपञ्चाशत् । तेनैतत्पञ्चकसमष्टित्वादेव पीठत्वं सिद्धमित्याशयेन तन्त्रेषु न पुनः पृथक्पीठरूपतोक्तिरिति वा तन्त्राशय इति मन्वान आह—

यावन्मातृकमुदितान्येकसमेतानि पञ्चाशत् ।
पीठानि पुनर्गणितान्योजापूकानि चत्वारि ॥ ९७ ॥
गणपग्रहभादीनां शशिनिधितारर्तुसूर्यसंख्यानाम् ।
मेलनतः पीठानि ज्ञेयान्येतेषु पञ्चपञ्चाशत् ॥ ९८ ॥

यावन्मातृकमित्यव्ययीभावः । यावन्तो मातृकास्तावन्ति पीठानीत्यर्थः । ओ, ओड्याणपीठम्; जा, जालंधरंपीठम्; पू, पूर्णगिरिपीठम; का, कामरूपपीठम् । नामैकदेशें नामग्रहणम्, तथैवं संप्रदायात् । भादीनां नक्षत्रयोगिनीराशीनाम् । शश्येकः । विधयो नव । ताराः सप्तविंशतिः । सारेति पाठेऽपि सकारः सप्तसंख्यायां सांकेतिकः, रेफस्तु द्विसंख्यायाम् । 'अङ्कानां वामतो गतिः' इत्युक्तेरुक्तैव संख्या सिध्यति । तदुक्तं वररुचिपरिभाषायाम्—'पादयः पञ्च याद्यष्ट कादयष्टादयो नव । एतद्भिन्नाक्षरं बिन्दुः संख्या तन्मेलनोद्भवा ॥' इति । ऋतवः षट् । सूर्या द्वादश ॥ ९७, ९८ ॥

There are fifty-one Pītha-s corresponding to the number of letters in the Alphabet. However, four more, *viz.*, O (Oḍyāṇa), Jā (Jālaṃ-dhara), Pū (Pūrṇa-giri) and Kā (Kāma-rūpa) have been added to the above. (97)

The Pīṭha-s are to be known as fifty-five, as they are composed of Gaṇa-pa, Graha-s, Bha-s, etc., which are of the number of the moon (one), the Nidhi-s (nine), the Tārā-s (twenty-seven), the Ṛtu-s (six) and the suns (twelve) respectively. (98)

अथ चक्रराजस्य विद्याऽक्षरजन्यत्वमुपपादयति द्वाभ्यां श्लोकाभ्याम्—

कत्रितयादीकाराद्बिन्दुर्जातस्तदग्रिमे चक्रे ।
हृल्लेखाभिस्तत्परचक्रत्रितयं हकाराभ्याम् ॥ ९९ ॥
एकारेण च तत्परचक्रे जाते सकाराभ्याम् ।
चतुरश्राणि लकारैरेवं विद्याऽक्षरेण चक्रजनिः ॥ १०० ॥

'इच्छाज्ञानाक्रियारूपमादनत्रयसंयुतम् । सदाशिवासनं देवि महाबिन्दुमयं परम् ॥' इत्यस्य इच्छाऽऽदयस्तिस्रः शक्तयो रूप्यन्ते जन्यन्ते यस्मादीकारात्स च मादनानां ककाराणां त्रयं चेत्येताभ्यां संयुतं जनितं महाबिन्दुमयं सदाशिवासनम्, ब्रह्मविष्णुरुद्रेश्वराः पादाः, फलकं सदाशिवमयम्, तादृशं सर्वानन्दमयं चक्रमित्यर्थः । अथ वा, इच्छाज्ञानाक्रिया रूपाश्च ते मादनाश्च त्रयं चेति द्वंद्वः । त्रयशब्देन बिन्दुत्रयात्मकत्वादीकारो ग्राह्यः । शेषं पूर्ववत् । तदेतदाह—कत्रितयादित्यादिना । सर्वसिद्धिप्रदसर्वरोगहराख्यचक्रद्वयमपि मिलित्वा नवयोन्यात्मकम्; तच्च तिसृभिर्लज्जाभिर्जातम्, 'हृल्लेखात्रयसंभूतैस्तिथिसंख्यैस्तथाऽक्षरैः । बिन्दुत्रययुतैर्जातं नवयोन्यात्मकं प्रिये ॥' इति वचनादित्याह—तदग्रिम इत्यादिना । सर्वरक्षाकरसर्वार्थसाधकसर्वसौभाग्यदायकाख्यं स्थितिचक्रत्रितयं तिसृभिः शक्तिभिस्त्रिभिरनलैश्च रचितं हकारद्वयेनैकादशस्वरेण च समुत्पन्नम् । तदुक्तम्—'मण्डलत्रययुक्तं तु चक्रं शक्त्यनलात्मकम् । व्योमबीजत्रयेणैव' इति । दशारद्वयं मन्वश्रं चेति मण्डलत्रयम् । व्योमबीजे त्रयं चेति विग्रहः । त्रयपदेन कोणत्रयात्मकत्वादेकारः । व्योमनी च बीजं चेति विगृह्य व्योमबीजान्येव त्रयमिति वा विग्रहः, बीजपदेनैकारः, तस्य ब्रह्माण्डादिकटाहान्तं प्रति बीजभूतत्वात्, 'यदेकादशमाधारं बीजं कोणत्रयात्मकम्' इति प्रयोगाच्च । हादिपक्षे तु न कोऽप्यत्र क्लेशः । तदेतदाह—तत्परेत्यादिनैकारेण चेत्यन्तेन । तत्परचक्रे इति । सर्वसंक्षोभणसर्वाशापरिपूरके इत्यर्थः । उक्तं च—'सरोरुहद्वयं शाक्तैः' इति । शाक्तैः सकाराभ्याम् । 'अक्षीणि मे—' इतिवद्बहुवचनम् । जन्यजनकयोः समसंख्याकत्वस्य सति संभवे युक्तत्वाच्च । अत एव हि हृल्लेखात्रयेत्युक्तश्लोके बिन्दुत्रययुतैरिति विशेषणस्य सार्थक्यम्, पञ्चदशस्वक्षरेषु बिन्दुनादत्रयस्यैकारैः सह मेलने प्रतिहृल्लेखं हकारो रेफ ईकारश्चेति त्रयमेवेति तत्त्रिकेन नवाक्षरसमूहेन नवयोन्यात्मकस्य

चक्रद्वयस्य जननसंभवात्, बिन्दुशब्दस्य बिन्द्वाद्युन्मन्यन्तसमूहपरत्वात्। स्वरूपकीर्तनमात्रपरत्वेन व्याख्यायां तु तद्वैयर्थ्यं स्पष्टम्। चतुरश्राणि त्रैलोक्यमोहनचक्रम्। उभयत्र बहुवचनं त्रित्वे ॥ ९९, १०० ॥

The origin of the Cakra out of the Akṣara-s of the Vidyā is as follows: The Bindu (Sarvānanda-maya) takes its origin out of the three *Ka*-s and *Īkāra*; the next two Cakra-s (Sarva-siddhi-prada and Sarva-roga-hara) out of the Hṛl-lekhā-s; the next three Cakra-s (Sarva-rakṣā-kara, Sarvārtha-sādhaka and Sarva-saubhāgya-dāyaka) respectively out of the two *Hakāra-s* and *Ekāra*; the next two Cakra-s (Sarva-saṃkṣobhaṇa and Sarvāś'ā-paripūraka) out of the two *Sakāra-s*; and the Catur-as'ra one (Trai-lokya mohana) out of the *Lakāra*-s. (99 & 100)

एतत्त्रितयाभिन्नः स्वगुरुस्तदभेदभावनादार्ढ्यात्।
तेन गणेशादिमयस्तद्दयया च स्वयं तथारूपः ॥ १०१ ॥

एतेषां देवताविद्याचक्राणां त्रितयेनाभिन्नः। तेन गणेशादिषड्रूपः श्रीगुरुः। तत्प्रसादेन स्वयं साधकोऽपि। तदुक्तम्—'देव्या देहो यथा प्रोक्तो गुरुदेहस्तथैव च। तत्प्रसादाच्च शिष्योऽपि तद्रूपः सन्प्रकाशते ॥' इति। देवीदेहे ये येऽवयवा यद्यद्रूपास्तत्तद्रूपावयवक एवैतयोर्देह इत्यर्थः ॥ १०१ ॥

One's Guru is identical with these three, *viz.*, Devatā, Vidyā and Cakra, in his intensity of faith in

such identity and hence with Gaṇes'a, etc.; similarly with the grace of the Guru, the pupil attains identity therewith. (101)

ननु गणेशाद्यात्मकत्वज्ञाप्यकः पञ्चाभेदः कथमुपपद्यते, गणपदस्य समुदायार्थकस्य समुदायिसापेक्षत्वेन समुदायिनां देवताऽक्षररेखाणां भेदे तद्भेदस्यावश्यिकत्वात्, नक्षत्रत्वादेरपि संख्यामात्रस्यानुगमकत्वेऽपि संख्यावतां विरुद्धधर्माधिकरणत्वेन भेदस्य संख्यावतां संमतत्वेन भिन्नभिन्नत्वात्; तेन च नैकस्यापि धर्मस्याभेदव्यापकतेति कथं तज्ज्ञाप्यकाभेदः साध्यत इति चेत्; मैवम्; वचनबलादेव समुदायिनां संख्यावतां चाभेदस्य सिद्धत्वात्, उपक्रमादिभिर्निर्णीततात्पर्यकस्य शब्दस्य प्रत्यक्षादिनिखिलप्रमाणेभ्योऽपि बलवत्तायाश्चन्द्रप्रादेशिकत्वभ्रमादावन्यत्र चौपनिषदैर्बहुतरं साधितत्वात्। किं च, स्वाश्रयसमानजातीयाश्रितस्वातिरिक्तस्वव्यापकसंख्याविरहसहकृतस्वत्वरूपसंख्यामात्रत्वमप्यभेदसाधकमेव, बाधकाभावात्। स्वपदानि नवादिसंख्यारूपाणि। तेन विद्या देवतास्वरूपादभिन्ना नवसंख्यामात्राश्रयत्वाद्देवतास्वरूपवदित्यादयः पृथक्पृथक्प्रयोगाः। अत एवैकत्वसंख्यामात्राश्रयत्वादाकाशकालदिगीश्वराणामभेदो दीधितिकृतः संमतः। इदं चानुमानमागमसहितमेव प्रमाणं विषयप्रमात्वदार्ढ्यसंपादनाय। तेन न घटत्वपटत्वादेरभेदापत्तिः। तदेतत्सर्वमभिसंधायोपसंहरति—

इत्थं माता विद्या चक्रं स्वगुरुः स्वयं चेति।
पञ्चानामपि भेदाभावो मन्त्रस्य कौलिकार्थोऽयम् ॥१०२॥

In this manner the identity of the Mother, the Vidyā, the Cakra, the Guru and (the pupil's) own

self is (patent). This is the *Kaulikārtha* of the Mantra. (102)

अथ क्रमप्राप्तं सर्वरहस्यार्थमाह—

द्वादशषोडशदशभिस्तपनशशिदहनकलाभिराकीर्णैः ।
पञ्चाशद्भिर्वर्णैरभिन्नदेहा कुलीनकुण्डलिनी ॥ १०३ ॥
बिसतन्वी तडिदाभा मूलाधारस्थपद्मश्रृङ्गाटात् ।
भित्त्वा मूलहृदाज्ञागतवह्निरवीन्दुमण्डलत्रितयम् ॥ १०४ ॥

सूर्यस्य कलास्तपिन्यादयो द्वादश ककारादिभिर्द्वादशभिरानुलोम्येन भकारादिभिः प्रातिलोम्येन द्वादशभिश्च युक्ताः । चन्द्रस्य कलाः षोडशामृताऽऽदयः षोडशभिः स्वरैर्युक्ताः । अग्नेः कला दश धूम्रार्चिरादयो यकारादिभिर्दशभिर्वर्णैर्युक्ताः । एवं पञ्चाशद्भिरक्षरैरभिन्ना कुलकुण्डलिनी बिसतन्तुतनीयसी तडित्कोटिप्रख्या । मूलाधारस्थपद्मश्रृङ्गाटात् मूलाधारस्य कर्णिकायां विद्यमानाच्छृङ्गाटात्त्रिकोणादुपरि सार्धत्रिवलयाकारेणाधोमुखी समुपविष्टा योगमर्यादया योगिभिरूर्ध्वमुखतयोत्थाप्यते । सा मूलाधारानाहताज्ञाचक्रेषु विद्यमानानि वह्निसूर्यसोममण्डलानि भिनत्ति ॥ १०३, १०४ ॥

The Kulīna-kuṇḍalinī, whose form is identical with those of the fifty letters represented by the twelve Kalā-s of the sun beginning from Tapinī, the sixteen Kalā-s of the moon beginning from Amṛtā, and ten Kalā-s of the fire beginning from Dhūmrārcis, *viz.*, twelve in order from *Ka* onwards and twelve from *Bha* in the reverse order (of the sun), the sixteen vowels

beginning from *A* of the moon, and the ten letters beginning from *Ya* (of the fire); (103)

as slender as the gossamer of the lotus-stalk, as bright as a flash of lightning, shooting upwards from the triangle of the lotus fruit in Mūlādhāra, piercing right through the Vahni-maṇḍala of Mūlādhāra, the Ravi-maṇḍala of An-āhata, and the Indu-maṇḍala of Ājñā-cakra; (104)

व्योमनि चिच्छशिमण्डलमध्ये त्वकुलेन संगम्य ।
उभयाङ्गसङ्गजन्यं प्रवाहयन्ती सुधापूरम् ॥ १०५ ॥
स्वयमपि तत्पानवशान्मत्ता भूत्वा पुनश्च तेनैव ।
मार्गेण परावृत्य स्वस्मिन्स्थाने सुखं स्वपिति ॥ १०६ ॥

'द्वादशान्तं ललाटोर्ध्वे कपालोर्ध्वावसानकम् । द्व्यङ्गुलोर्ध्वे शिरोदेशं परं व्योम प्रकीर्तितम् ॥' इत्युक्तलक्षणे व्योमनि विद्यमानस्य चिच्छशिमण्डलस्याधोमुखसहस्रारकर्णिकारूपस्य मध्ये स्थितयाऽकुलकुण्डलिन्या संगम्य ततोऽमृतपूरं स्रावयित्वा डाकिन्यादिमण्डलान्याप्लावयन्ती स्वयमपि तत्पानेन मत्ता भूत्वा पुनस्तेनैव सुषुम्णामार्गेण परावृत्य स्वस्थाने सुखं स्वपिति । सर्वमेतद्योगिनामनुभवगम्यम् । योगशास्त्रमर्यादाज्ञानमात्रवतां तु परोक्षज्ञानगोचरो गुरुमुखादेव विविच्य बोद्धव्यमिति नेह विविच्यते ॥ १०५, १०६ ॥

mixing with the A-kula (Kuṇḍalinī) of the lunar sphere in the Ākāśa and causing the stream of Nectar

generated by the conjunction of the two to inundate those regions; (105)

getting herself intoxicated from a deep draught thereof and retracing Her steps along the same course, (She) sleeps soundly in Her own place. (106)

साक्षाद्विद्यैवैषा न ततो भिन्ना जगन्माता ।
अस्याः स्वाभिन्नत्वं श्रीविद्याया रहस्यार्थः ॥ १०७ ॥

ईदृश्याः कुण्डलिन्या मातुर्विद्यायाः स्वस्य चाभेद इति रहस्यरूपोऽप्रकाश्योऽर्थ इत्यर्थः ॥ १०७ ॥

This (Kuṇḍalinī) is identically the same as the Vidyā and the World-Mother is in no way different from Her. The (pupil's) identity of his own self with this (Kuṇḍalinī) is the *Rahasyārtha* of the S'rī-vidyā. (107)

अथ महातत्त्वार्थमाह—

वागिन्द्रियैरगम्ये तत्त्वातीते महत्तरेऽणुतरे ।
व्योम्नोऽप्युपरि स्थितिमति विश्वाभिन्ने चिदानन्दे ॥ १०८ ॥
ब्रह्मणि परे नियोज्यः स्वात्मा तदभेदसंप्राप्त्यै ।
एष महातत्त्वार्थः श्रीविद्यायाः शिवेनोक्तः ॥ १०९ ॥

वागगम्ये शब्दशक्यताऽवच्छेदकाभाववति; इन्द्रियागम्ये घ्राणजादिषड्विधप्रत्यक्षाविषये; 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह,'

'अशब्दमस्पर्शमरूपम्' इत्यादिश्रुतेः। न च सर्वथा ज्ञानाविषयस्यालीकताऽऽपत्तिः, शब्दैर्लक्षणया गम्यत्वात्, शाब्दप्रत्यक्षविषयत्वाच्च। तत्त्वातीते शिवादिक्षित्यन्तषट्त्रिंशत्तत्त्वान्यतिक्रान्ते। महत्तरे महतो महीयसि। अणुतरे, अणोरणीयसि। आकाशादिजनकत्वान्महत्त्वमुपचर्यते, स्थूलदृष्ट्यविषयत्वादणुत्वमपि तथा; न पुनः परिमाणविशेषः, तत्र तदभावात्। अत एव 'अणोरणीयान्महतो महीयान्' इति श्रुतिरप्यविरोधेन संगच्छते। व्योम्न उक्तलक्षणादुपरि स्थितिमति, उपासनार्थं कल्पितस्थानविशेषेणोपलक्षिते। विश्वाभिन्ने, परिणामित्वात्। चिति स्वप्रकाशे। आनन्दे सुखैकस्वरूपे। परे ब्रह्मणि स्वात्मा नियोज्यः। तेन सहाभेदस्य स्वाज्ञानवशादलब्धप्रायस्य संप्राप्त्यै, 'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुतेः। सकलतत्त्वमूलभूतत्वादयं महातत्त्वार्थ इत्युच्यते ॥ १०८, १०९ ॥

Unapproachable by word or mind and other senses, transcending the (thirty-six) Tattva-s, bigger than the biggest and smaller than the smallest, with a place loftier than the skies, identical with the Universe, assuming the (subtle) forms of Cit (Consciousness) and Ānanda (Bliss); (108)

(such is *Brahman*) and therein should one concentrate his soul with a view to attain identity therewith (with *Brahman*). This is the *Mahā-tattvārtha* of the S'rī-vidyā as expounded by S'iva. (109)

अथ नामार्थशब्दरूपार्थावाह—

तत्तद्वर्णार्थेयं तत्तद्वर्णस्वरूपेयम्।

इति तु श्रीविद्याया नामार्थः शब्दरूपार्थः ॥ ११० ॥

तत्तद्वर्णशब्देन ककारादयोऽष्टपञ्चाशद्वर्णाः सप्तत्रिंशद्वर्णाः पञ्चदश वर्णा वा गृह्यन्ते, तेषां च सर्वेषां ब्रह्मवाचकत्वेन 'सहस्रशीर्षा पुरुषः' इत्यादिवत्सामानाधिकरण्येनान्वये सिद्धे 'अस्तिर्भवन्तीपरः प्रथमपुरुषे ऽप्रयुज्यमानेऽप्यस्ति' इति कात्यायनवचने भवन्तीपर इत्यस्य लट्पर इति व्याख्यानात् 'अस्ति' इति शेषपूरणेन वाक्यार्थो वर्णनीयः। एवं सति नामार्थस्त्रिविधः संपद्यते—अष्टपञ्चाशन्नामकः सप्तत्रिंशन्नामकः पञ्चदशनामकश्चेति, अत्र पक्षत्रयेऽपि ककारादीनामन्यतमस्य ब्रह्मवाचकत्वात्। अन्येषां पुनरुक्तानामकारककारादीनां वैयर्थ्यपरिहारस्तु 'अकारो ब्रह्म-विष्ण्वीशकमठेष्वङ्गणे रणे' इत्यादिरीत्या विश्वप्रकाशकोशे तत्तदक्षराणामनेकार्थवाचकत्वोक्तेस्तेषु योग्यतामनुसृत्यार्थवर्णनेन कार्यः। 'शतकृत्वोऽपि पथ्यं वदितव्यम्' इति न्यायाच्चैतादृशस्थलेषु न पौनरुक्त्यं दोषः। एवं च सर्वेषामक्षराणां तत्तद्वाचकत्वेन रूढ्या वा प्रत्यक्षरं सोलोपस्यावश्यकत्वेन प्रातिपदिकमात्रावशेषाद्वोपासकजनेषु प्रसिद्धत्वाद्वा संभाव्यत्वाद्वा परिपक्वार्थ-रूपत्वाद्वा नामार्थ इति संज्ञा, 'नामधेयं च नाम च' इति कोशात्। यद्यप्याथर्वणे गोपथब्राह्मणे 'ओंकारं पृच्छामः को धातुः किं प्रातिपदिकं किं नामाख्यातम्' इत्येव प्रयोगः, तथाऽपि 'सत्त्वप्रधानानि नामानि' इति यास्कप्रयोगान्नामपदेनापि प्रातिपदिकाभिधानसंभवात्, अव्ययगणे 'नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने' इति कोशोक्तेः। आमोऽपक्व-स्तद्भिन्नो नामः, नकारेणैवात्र समासो न नञा। तेन 'नलोपो नञः' (६–३–७३) इत्यादेरनापत्तिः, नास्तिक इत्यादिवत्। परिपक्वता विरस-त्वाभाव इत्यर्थात्। 'तत्तद्वर्णस्वरूपेयम्' इत्यत्रापि पूर्ववत्पक्षत्रयम्। ननु—ककारादिस्वरूपत्वं नामतः शब्दाभिन्नत्वम्; तथा च न स ककारस्थार्थः, शब्दस्वरूपे शक्त्यभावात्, न हि 'घटमानय' इत्यादौ घटशब्दस्या-

नयनक्रियाऽन्वयः; अत एव न शब्दार्थयोरभेदपक्षोऽपि युज्यते, वह्न्यादिशब्दोच्चारणे मुखदाहाद्यापत्तेश्चेति चेन्न; शब्दस्य स्वस्वरूपेऽपि शक्तेस्तन्त्रवार्त्तिकादावुक्तत्वात् । उक्तं च भर्तृहरिणा—'ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा । तथैव सर्वशब्दानामेते पृथगवस्थिते ॥' इति । अत एव 'शब्दार्थयोस्तादात्म्यमेव शक्तिः' इति शाब्दिकनव्या इत्यन्यत्र विस्तरः । इत्थं च ककारादिवर्णरूपेत्यादिर्मन्त्रार्थः । अत्र शब्दस्वरूपस्यैवार्थत्वेन वर्णनाच्छब्दरूपार्थोऽयमिति व्यपदिश्यते ॥ ११० ॥

The Vidyā is Herself the meaning conveyed by every one of the A-kṣara-s composing Her. She is Herself of the form of every one of those A-kṣara-s. These are the *Nāmārtha* and *S'abda-rūpārtha* respectively of the S'rī-vidyā. (110)

अथ नामैकदेशार्थमाह—

कल्याण्येकाक्षर्यावीशित्री चापि ललिता च ।
इत्थं नामत्रिशतीवाच्योऽर्थस्तत्तदक्षरस्यापि ॥ १११ ॥
नामैकदेशमात्रे नामग्रहणस्य लोकसिद्धत्वात् ।
नामोपस्थितिगम्यः प्रोक्तो नामैकदेशार्थः ॥ ११२ ॥

अत्र हि 'ककाररूपा कल्याणी' इत्यादिना पञ्चदशाक्षर्या एकैक-नामाक्षरमादितः कृत्वा तादृशनामानि प्रत्यक्षरं विंशतिरुक्तानि । तानि च त्रीणि शतानि भवन्ति । तानि च मन्त्राक्षराणामर्थप्रकाशनार्थं प्रवृत्तानि । तथा च ककारस्य 'ककाररूपा कल्याणी कल्याणगुणशालिनी' इत्यादयो-

विंशतिरर्थाः । एवमेकारादीनामपि पार्थक्येन विंशतिरर्थाः। तेषु च सर्वेषु प्रसिद्धकोशव्याकरणादिरीत्या शक्तेरभावादेतद्बलादेव कल्पनस्यार्थापत्तिशरणत्वात्, अन्यथाऽनुपपत्तिरूपार्थापत्तेश्च "नामैकदेशे नामग्रहणम्' इति न्यायेन परिक्षयात्, तेषां नाम्नामेकदेशा एव ककारादय इति कल्प्यते। अत एवाचार्यभगवत्पादैः 'शिवः शक्तिः कामः' इत्यादीनामुद्धृतवर्णानां नामावयवत्वं स्पष्टमुक्तम् 'भजन्ते वर्णास्ते तव जननि नामावयवताम्' इति सौन्दर्यलहर्याम्। अस्ति हि नामैकदेशे नामग्रहणम् 'भीमो भीमसेनः' "सत्या सत्यभामा' 'गुरुर्लघुर्गलौ च' इत्यादौ, 'अनुष्टुभि, यज्ञायज्ञीये, उद्गीथोपान्त्यम्, गायत्त्रीषु, जराबोधीये, रथन्तरे, प्रतिहारादिः' इति वक्तव्ये 'ष्टुभि, ज्ञीये, गीथोपान्त्यम्, त्रीषु, बोधीये, तरे, हारादिः' इत्यादिप्रयोगाः सामवेदिनां फुल्लसूत्रे च बहुलमुपलभ्यन्ते। तत्र च ककारादिनाम्नामानन्त्यात्ककारस्याप्यनन्तार्थकत्वे प्राप्तेऽयं नियम एत एवार्था नान्य इति। तेषु च प्रत्यक्षरं प्रथमनाम्नां नामार्थशब्दरूपार्थाभ्यां पौनरुक्त्यादिहैकोनविंशतिरेवार्था विवक्षिताः। तथा च नामैकदेशार्थोऽप्येकोनविंशतिविधः संपन्नः। अत्र च पञ्चदशसंख्यासु विंशिकासु प्रथमनामानि परित्यज्य द्वितीयनामान्युट्टङ्कितानि, प्रथमनाम्नां पूर्वतनार्थवर्णनेन लब्धत्वात्॥ १११, ११२॥

The import of the names in series (of twenty each) Kalyāṇī, Ekākṣarī, Īs'itrī, Lalitā, etc., of the Nāma-tri-s'atī, is conveyed by the letters of the Mantra (with which they begin). (111)

According to the vogue of the world the whole name is comprehended even if a part of it is mentioned. The meaning of the whole name is therefore

the *Nāmaika-deśārtha* (the meaning of a part of such name). (112)

एतेषु च विंशतिसंख्याकेष्वर्थेषु ककारस्य ककाररूपेत्यर्थवर्णनदशायामेकारस्यैकाररूपेति, ईकारस्येकाररूपिणीत्येवार्थो वर्णनीय इति न नियमः, ककाररूपैकाक्षरी, ईप्सितार्थप्रदायिनीत्यप्यर्थस्य सुवचत्वात् । एवं चात्र पञ्चदशाक्षराणि विलिख्य प्रत्यक्षरशिरसि विंशत्यङ्कान्दत्त्वा परस्परं हनने चरमाक्षरे या संख्या निष्पद्यते तामेवाह—

तिथिमितबिन्दुगणोत्तरगजरसगिरिदस्रसंख्याकाः ।
अर्था भवन्ति योगान्नाम्नो नामैकदेशस्य ॥ ११३ ॥

नाम्नो नामार्थेषु तृतीयपक्षस्यैकस्य नामैकदेशार्थस्यैकोनविंशतिविधस्य च योगादुक्तरीत्या गुणनात् तिथिभिः पञ्चदशसंख्यया मितः संमितो यो बिन्दुगणस्तस्योत्तरे ये गजादयः; गजा अष्टौ, रसाः षट्, गिरयः सप्त, दस्रौ द्वौ, रामास्त्रयः । 'अङ्कानां वामतो गतिः' इति न्यायादादौ पञ्चदश बिन्दून्विलिख्य तद्वामे गजादीन्विलिखेत्, वामगतौ वामभागस्यैवोत्तरत्वात् । अथ वा, बिन्दुगण उत्तरो येभ्यस्ते गजादय इति विग्रहः । गजादीन्वामगत्या विलिख्य जातस्याङ्कसमूहस्योत्तरत्र दक्षिणगत्यैव बिन्दवो लेख्या इत्यर्थे फलिते न विवादः । एवं च शतत्रयोत्तरसप्तविंशतिसंख्याकपरार्धानि षण्मध्यान्यष्टान्त्यानि च त्रिशत्युक्तार्थभेदा भवन्ति । अङ्कतोऽपि ३२७६८,०००,०००,०००,०००,००० । एतदङ्कज्ञानप्रकारस्तु 'चरमाङ्कमारभ्य पूर्वपूर्वाङ्कदशदशगुणिता उत्तरोत्तराङ्काः' इति परिभाषया । तन्नियमश्च लीलावत्याम्—'एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः ।

अर्बुदमब्दं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात । जलधिश्चान्त्यं मध्यं परार्ध-मिति दशगुणोत्तरं संज्ञाः ॥' इति । एतदग्रेऽप्यङ्कविस्तरस्तु च्छन्दः-कौस्तुभेऽष्टमेऽध्याये प्रपञ्चितोऽस्माभिः ॥ ११३ ॥

By applying the above principle of the part conveying the meaning of the whole to each one of the names occurring in the Nāma-tri-s'atī, *i.e.*, by raising twenty to the power of fifteen, are got 32,768,000,000,000,000,000 meanings, by writing out as many zeros as there are Tiṭhi-s (fifteen) and by placing the following figures connoted by the Saṃketa-s, Gaja (eight), Rasa (six), Giri (seven), Dasra (two) and Rāma (three) before them. (113)

अथ शाक्तार्थो द्विविधः—अवयवार्थः शक्तिसमूहार्थश्चेति । तत्रा-वयवार्थो नाम देव्या अवयवानां वर्णनम् । तदाह—

वाक्कामशक्तिकूटैरवयवशो विग्रहो मातुः ।
प्रतिपाद्योऽत्रा कण्ठादा मध्यादा च पादाग्रात् ॥ ११४ ॥

अत्र विद्यायां वाक्कूटेन, आ काण्ठात्कण्ठमभिव्याप्य, अर्थात्किरीट-मारभ्याक्यवशो विग्रहः प्रतिपाद्यः । कामराजकूटेन कण्ठाधःकटिपर्यन्त-विग्रहः । शक्तिकूटेन कट्यधः पादाग्रान्तो देहः प्रतिपाद्य इत्यर्थः । अत एव वाच्यवाचकयोरभेदविवक्षयोक्तं सहस्रनामसु—'श्रीमद्वाग्भवकूटै-कस्वरूपमुखपङ्कजा । कण्ठाधःकटिपर्यन्तमध्यकूटस्वरूपिणी ॥ शक्तिकूटै-

कताऽऽपन्नकट्यधोभागधारिणी । मूलमन्त्रात्मिका मूलकूटत्रयकलेबरा ॥'
इति ॥ ११४ ॥

In this Vidyā the body of the Mother composed of the three Kūṭa-s has for its parts the portion from the tip of the Kirīṭa to the neck, thence to the hip, and thence to the tip of the toes. (114)

शक्तिसमूहार्थमाह—

वेधोभारत्यौ माधवलक्ष्म्यौ रुद्रपार्वत्यौ ।
रेफान्तवर्णषट्कस्यार्थान्क्रमशो विजानीयात् ॥ ११५ ॥

अत्र हकाररेफयोर्विभज्य गणनम्, दुर्वासादिविद्याविशेषेषु तथैव पाठात् ॥ ११५ ॥

The six letters of the first Kūṭa ending with *r*, should be understood to signify in order, the three pairs, Brahman and Bhāratī, Viṣṇu and Lakṣmī, and Rudra and Pārvatī. (115)

ता एताः सकला अपि कामकला एव न ततोऽन्याः ।
सामानाधिकरण्यादीकारेणायमर्थोऽस्य[1] ॥ ११६ ॥

एता ब्रह्मादयः षट् । यद्यपि ब्रह्मादीनां पुंस्त्वेन भारत्यादीनां स्त्रीत्वेन तद्वाचकशब्दे 'पुमान्स्त्रिया' (१-२-६७) इत्येकशेषतः 'एते'

[1] ऽस्याः

इत्येव भाव्यम् ; तथाऽपि ब्रह्मविष्णुमहेश्वराणां स्त्रीरूपतया भावार्थप्रकरणे कथितायाः स्मरणायैवमुक्तिः । सामानाधिकरण्यादेकविभक्तिकत्वरूपात् । प्रत्यक्षरं विद्यमानानां सुपां तु लोपः । वाक्ये संहिताया अविवक्षणादीकारेण सह न संधिः ॥ ११६ ॥

All these (latter) are after all identical with Kāmakalā-s (ī) and do not in any way differ from them, this significance being derived from the appositional character of the *īkāra* therein. (116)

अयमेव कूटयोरपि परयोरर्थः परं तु तार्तीये ।
द्वैतीयीकद्वैतीयीकहकारः सकारतः पूर्वः ॥ ११७ ॥
अन्वयितव्योऽक्षरशः शक्तेः शाक्तैर्विभाव्यत्वात् ।
वामेच्छाऽऽदिकशक्तिमयत्वोक्तेरेष शाक्तार्थः ॥ ११८ ॥

प्रथमकूटस्य यावानर्थस्तावानेन द्वितीयतृतीयकूटयोः । द्वितीयकूटे मध्यमहकारः परं तृतीयकूटस्य प्रथमभागेऽन्वययोग्यः । तस्य तत्र चतुर्थत्वेऽपि सजातीययोर्मध्ये द्वितीयत्वात्तथोक्तिः । तेन तयोरपि कूटयोः प्रातिस्विकं रेफान्ता वर्णाः षडेव संपद्यन्त इति तेषामुक्तरीत्यैवार्थवर्णनम् । अत्र प्रत्यक्षरमेकैकत्र शक्तिः । तेन शक्तानामक्षराणामर्थः शाक्तार्थः । स्वार्थेऽण् । अथ वा शाक्तानामुपासकानामर्थः प्रयोजनम् , अथ वा शक्तिसमूहः प्रतिपाद्यत इति त्रेधा निर्वचनम् । भावार्थेन सह पौनरुक्त्यपरिहारस्तु पूर्वमेव कृतः ॥ ११७, ११८ ॥

This again is the meaning of the other two Kūṭa-s as well. However the second *Ha* of the second Kūṭa

should be clubbed with the *Sa* in the third Kūṭa. As there is S'akti in every one of the Akṣara-s, as S'ākta-s also construe in that manner, and as they (the Akṣara-s) are considered to be identical with the S'akti-s—Vāmā, Icchā and others, this is the *S'āktārtha*. (117 & 118)

अथ सामरस्यार्थमाह—

कहयोर्लसयोरर्थौ शिवशक्ती शुद्धयोरचोः शक्तिः ।
उभयोः समरसभावो हृल्लेखायाः परं ब्रह्म ॥ ११९ ॥
ब्रह्मैव शिवः शक्तिश्चेति प्रत्येककूटार्थः ।
शिवशक्तिसामरस्याद्विद्याया एष सामरस्यार्थः ॥ १२० ॥

कादिविद्यायां हि ककारास्त्रयो हकारौ द्वौ । तेषां शिव एवार्थः । एवं लकारास्त्रयः सकारौ द्वौ, तेषां शक्तिः । अत एव मन्मथबीजे ककारलकारयोर्योगः, पराप्रासादे हकारसकारयोः । शुद्धयोरचोर्द्वितीयतृतीययोः शक्तिः । लज्जाबीजस्योभयसामरस्यात्मकं परं ब्रह्मार्थः । व्योमाग्नितुरीयस्वरबिन्दुभिः क्रमेण प्रकाशप्राससामरस्यतादात्म्यापन्नेत्यर्थस्य परब्रह्मैकरूपस्य षट्चत्वारिंशदुत्तरशततमश्लोकव्याख्यायां स्पष्टीकरिष्यमाणत्वात् । शिवः शक्तिश्चेत्येतदुभयं ब्रह्मैवेति प्रतिकूटमर्थः । तदुक्तं त्रिशत्याम्—'कत्रयं हद्वयं चैव शैवो भागः प्रकीर्तितः । शेषाणि शक्त्यक्षराणि ह्रींकार उभयात्मकः ॥' इति ॥ ११९, १२० ॥

The meaning of *Ka* and *Ha*, and of *La* and *Sa* is S'iva and S'akti respectively. The meaning of the pure

vowels *E* and *Ī* is S'akti. The meaning of the Hṛl-lekhā (*Hrīṃ*) is *Para-Brahman*, the result of the concordance of S'iva and S'akti. (119)

The meaning of every one of the three Kūṭa-s is: '*Brahman* is S'iva and is also S'akti,' owing to the concordance existing between S'iva and S'akti. This is the *Sāma-rasyārtha* of the Vidyā. (120)

अथ समस्तार्थमाह—

कन दीप्ताविति धातोः प्रकाशकत्वं ककारार्थः ।
अध्ययनार्थकतेङः स्यादेकारस्तदीयकरणार्थः ॥ १२१ ॥
वर्णद्वयमेलनतः प्रकाशिका बुद्धिरित्यर्थः ।
ई व्याप्ताविति धातोस्तस्या व्याप्तिस्तृतीयवर्णार्थः ॥ १२२ ॥
तस्य लहर्याधिक्यं तन्निर्माणं मकारार्थः ।

कन्यते प्रकाश्यतेऽनेनेति कं प्रकाशकम् । बाहुलको नलोपः । औणादिकः 'अमन्ताड् डः' (१११) इति डप्रत्ययो वा । 'इङ् अध्ययने' इति धातुरधिपूर्वोऽपि प्रकृत आर्षत्वात्तद्विमोकः । अत एवेङः क्विपि कृते, कित्त्वेऽपि गुणः । विज्वा कार्यः । अधीयते ऽनेनेत्यध्ययनकरणं बुद्धिः । अनयोः कर्मधारयः । असंधिरार्षः । तत ईकारेण षष्ठीतत्पुरुषः । लहरीत्यत्राकारलोपः । 'माङ् माने' इति धातोः क्विपि तल्लोपे 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (ग-२०३) इति णिचि 'णेरनिटि' (६-४-५१) इति टिलोपे च म् इति सिध्यति । प्रकाशकत्वं सूक्ष्मत्वम् । तथा च सूक्ष्ममतिव्यापनाधिक्यं प्रथमकूटार्थः ॥ १२१, १२२ ॥

Kakāra means 'luminosity' as it is derived from the root '*Kan*, to shine'. Derived from the root '*In*, to study' *Ekāra* means (Buddhi) the instrument of memory. (121)

By the combination of the two letters is meant 'luminous intellect.' Derived from the root '*Ī*, to pervade' the third letter *Ī* means pervading. (122)

Her (Buddhi's) predominance is *LaHrī*; the causing of such predominance is indicated by Makāra (ṃ). (122-)

हन हिंसायामिति हं शौर्यं प्रत्यर्थिहननकरणत्वात् ॥१२३॥
सं भोगसाधनं धनमुपभोगार्थात्स्यतेः सुनोतेर्वा ।
कमु कान्ताविति धातोरिच्छाविषयोऽङ्गनाऽऽदिः कम् ॥
एषां गमनं प्रापणमोहाङ्-गत्यर्थधातुजन्यं हम् ।
तस्यातिशयो लहरी तत्र श्लिष्टः सवर्णदीर्घेण ॥ १२५ ॥
ईकारस्तस्यार्थः कीर्त्तिः सर्वासु दिक्षु दीप्तत्वात् ।
ई दीप्ताविति धातोर्निर्मितिरनयोर्मकारार्थः ॥ १२६ ॥

हन्यतेऽनेनेति हं शौर्यम् । 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' (६-४-३७) इति नलोपः । 'षो अन्तकर्मणि' इति 'षुञ् अभिषवे' इति वा धातोः करणार्थे डप्रत्यये सम् इति रूपम् । सीयत इति सूयत इति वा सं द्रव्यम् । काम्यत इति कं स्रक्चन्दनवनिताऽऽदिकम् । हसकानां द्वंद्वः । ततो हकारेण प्राप्त्यर्थकेन षष्ठीतत्पुरुषः । ततो लहरीपदेन तत्पुरुषः । तत ईकारेण कीर्त्यर्थकेन द्वंद्वः ।

ततो मकारेण तत्पुरुषः । तथा च शौर्यधनस्त्रीप्राप्त्यतिशयस्य कीर्तेश्च निर्माणं द्वितीयकूटार्थः ॥ १२३–१२६ ॥

Derived from the root '*Han*, to give pain to' *Ha* means valour, as it is the cause of vanquishing the enemy. (-123)

Sa means wealth, which is the aid to enjoyment, as it is derived from the root '*So*, to enjoy' or '*Sū*, to procreate.' *Ka* means women, etc., the objects of desire, as it is derived from the root '*Kam*, to desire.' (124)

Ha derived from the root '*Ohāṅ*, to go' means the attainment of these (*viz.*, valour, etc.). The (attainment in) plenty of this is *LaHarī*, with which is combined *ī* by the process of Savarṇa-dīrgha (the lengthening of similar vowels in Saṃdhi). (125)

This *ī* means fame, as it is derived from the root '*Ī*, to shine' and shines in all directions. *ṃ* means the generation of these two *LaHarī* and *Ī*. (126)

तदेव तावद्वदति—

वाग्भवकूटस्यार्थः सूक्ष्ममतिव्यापनाधिक्यम् ।
शौर्यधनस्त्रीयशसामाधिक्यं कामराजार्थः ॥ १२७ ॥

स्पष्टम् ॥ १२७ ॥

The meaning of the Vāg-bhava-kūṭa is the prevalence in excess of the subtle intellect. The meaning

of Kāma-rāja-kūṭa is the preponderance of valour, wealth, women and fame. (127)

एते सम्यक्कलयति सकला हरतेर्हकारः स्यात् ।
निखिलजगत्संहर्त्रीत्यर्थस्तस्यापि वर्णस्य ॥ १२८ ॥
ईकारः प्रश्लिष्टः सृष्टिस्थितिरूपदीप्तिकर्त्रर्थः ।
यद्वा हृदि खेदहरे प्रकाशते तेन माता ह्रीः ॥ १२९ ॥
सकलान्तेन पदेन ह्रीकारे कर्मधारयः कार्यः ।
तस्य विशेष्यो मः स्यान्नादार्थः संविदर्थो वा ॥ १३० ॥

कूटद्वयस्य द्वंद्वः । एते निर्माणे सम्यक्कलयतीति सकला । मकारलोपः । हरतीति ह । 'ई दीप्तौ' इति धातोः ई दीप्तिः । दीप्तिर्नाम सृष्टिः स्थितिश्च । हकारेकारयोः कर्मधारये यणि कृते ह्रीः सृष्ट्यादिपञ्चकृत्यकर्त्रीत्युपलक्षणविधयाऽर्थः । यद्वा, हरति सर्वं विषयीकरोतीति हृ । क्विप् । आगमशास्त्रस्यानित्यत्वात्प्रकृते न तुक् । तच्च दहराकाशम् । तत्र प्रकाशत इति ह्रीः । ह्रीकारान्तपदस्य मकारेण कर्मधारयः । यद्यपि कूटत्रयेऽपि मकारो नास्त्येव, अनुस्वारस्यैव तन्त्रेषूद्धृतत्वात्; तथाऽपि मकारस्यैव लक्षणवशादनुस्वार इति कूटद्वये सुवचम् । चरमकूटे त्वनुस्वार एव विशेष्योऽस्तु । ततश्च, बुद्धिशौर्यधनस्त्रीयशसामाधिक्यकर्तृ निखिलजगत्सृष्ट्यादिकर्तृ दहराकाशवर्ति नादरूपं चिद्रूपं ब्रह्मेति मन्त्रार्थः सिद्धः । अयं चार्थो ब्रह्मसूत्राणां शक्तिपरत्वेन योजनां प्रदर्शयद्भिस्तत्रभवद्भिर्भाष्यकारैर्विस्तरेण निरूपित इह संक्षिप्योक्तः । तत्र क्वचित्क्वचिद्व्याकरणविरोधः प्रतीयते । स च मन्त्रस्यं मन्त्रार्थस्य चर्षिप्रोक्तत्वेन प्रामाणिकत्वे सिद्धे

'प्रयोगशरणा वैयाकरणाः' इत्युक्तेरेतदनुसारेणैव व्याकरणलक्षणानां कल्प्यत्वापरिहार्यः ॥ १२८—१३० ॥

The part *Sa Ka La* (of the third Group) indicates, that which brings about the action (conveyed by the two *Makāra*-s mentioned above). *Hṛ*, which is derived from the root '*Hṛ* to take away' signifies the destroyer of the entire Universe. (128)

The *ī* found in combination therewith (with *Hṛ*) signifies that Radiance which is the cause of Creation and Preservation. In other words, *Hṛī* signifies that Mother who shines in the heart (Daharākās'a) dispelling all pain. (129)

The word ending with *Sa Ka La* forms with the *Hṛīkāra* a Karma-dhāraya (Appositional compound) with *m*, which means either Nāda or Saṃvid (knowledge), as the substantive which it qualifies. (130)

तत्प्रकारमेव प्रदर्शयति—

धातोर्बह्वर्थत्वाद्बहुलग्रहणात्पृषोदरादित्वात् ।
आकृतिगणपाठेन स्वेच्छाऽनुगुणादुणादिकल्पनतः॥१३१॥
छन्दसि सर्वविधीनां वैकल्पिकतावशादमुष्य मनोः ।
सिद्धैः कथितेऽर्थेऽस्मिन्वैयाकरणानुशासनानुमतिः ॥१३२॥

'कुर्दखुर्दगुर्दगुद' क्रीडायामेव' इत्येवकारेण 'तनूकरणे तक्षः' (३-१-७६) इत्यत्रार्थनिर्देशबलाच्च सत्ताऽऽद्यर्थनिर्देशस्योपलक्षणमात्रत्वेन

धातवोऽनेकार्थाः'। तेन स्यतेरन्तकर्मवाचकत्वेऽप्युपभोगार्थकत्वमविरुद्धम् । अत एव चेङोऽधिपूर्वत्वात्केवलप्रयोगासंभवेऽपि 'इटकिटकटी गतौ' इत्यत्र प्रश्लिष्ट ईकार एवैतदर्थको भविष्यति, गत्यर्थानां सर्वेषामपि ज्ञानार्थकत्वात् । बहुलेति । 'क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्य एव । विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥' इति बहुलपदार्थः । तेन ल्ह्वीत्यत्राकारलोपः सिद्धः । 'रण्डः' इत्यादिसिद्ध्यर्थमडितोऽपि अमन्ताड्डस्य डित्त्वमपि सिद्धम् । गत्यन्तरमप्याह— पृषोदरादित्वादिति । 'पृषोदरादीनि यथोपदिष्टम्' (६-३-१०९) पृषोदरादयः शब्दा यथैव शिष्टैः प्रयुज्यन्ते तथैव साधवः, न तत्र लक्षणान्तरं मृग्यमित्यर्थः । न चैवं सति स्थलान्तरेऽपि ल्ह्वीति प्रयोगापत्तिः पृषोदरशब्दवदिति वाच्यम्, अत्रैव साधुरिति नियमस्वीकारात् । अत एव 'गूढोऽऽत्मा' इति न स्थलान्तरे प्रयुज्यते । अत एव च विष्णुसहस्रनामभाष्ये 'न्यग्रोधोदुम्बरोऽश्वत्थः' इत्यत्र पृषोदरादित्वात्संधिरित्युक्तं शंकरभगवत्पादैः । गणपाठाभावे त्वाह— आकृतीति । षुन्धातोर्डेप्रत्ययादर्शनादाह— स्वेच्छेति । 'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे । कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥' इति वचनाट्टिलोपार्थं डित्त्वकल्पनेत्यर्थः । छान्दसत्वसमाधानं तु निरङ्कुशमित्याह— छन्दसीति ॥ १३१, १३२ ॥

The meaning given to the Mantra by Siddha-s (Adepts) will be found to have the sanction of Grammarians (for one or other of the following reasons): roots are capable of more meanings than one; Bahula is an accepted convention; cases there are which are comprised in Pṛṣodarādi-gaṇa, or come

under the Ākṛti-gaṇa-pāṭha; the import of Uṇ-ādi-sūtra-s is twisted to suit the purpose; rules of ordinary grammar cannot be strictly applied to Chandas. (131, 132)

समस्तार्थपदनिरुक्तिपूर्वकमुपसंहरति—

बहुतरसमासयोगात्समस्तपुरुषार्थसाधनत्वोक्तेः ।
संक्षेपात्सारोक्तेः श्रीविद्यायाः समस्तार्थः ॥ १३३ ॥

समस्तपदस्यार्थ इति वा, समस्ताः सकला अर्थाः पुरुषार्था यस्मिन्निति वा, समस्तः संक्षिप्तोऽर्थ इति वा निरुक्तिः ॥ १३३ ॥

The *Samastārtha* of the S'rī-vidyā is so called, because it involves the compounding of several words, attributes to the Mantra the accomplishment of all human desires, and gives out the essence of the Vidyā in an abridged form. (133)

अथ सगुणार्थमाह—

को विधिरेकारो हरिरकार ईशः स्तवार्थमीडपदम् ।
द्विस्वरमध्यगतस्य डकारस्य ळकार आदेशः ॥ १३४ ॥
तेनर्ग्वेदात्मत्वं सूचितमाद्यस्य कूटस्य ।
क्रमशोऽग्रिमकूटयुगे तेन यजुःसामता सिद्धा ॥ १३५ ॥
ह्रीमिति नाम विशेष्यं नपुंसकं ब्रह्मलक्षकत्वेन ।
विधिहरिगिरिशैरीड्यं ब्रह्मेति प्रथमकूटार्थः ॥ १३६ ॥

एकारोत्तरं पूर्वरूपेणाकारः प्रश्लिष्यते । स च शिववाचकः, 'अकारो ब्रह्मविष्ण्वीशकमठेषु' इति कोशात् । 'कः प्रजापतिरुद्दिष्टः' इति 'एकार उच्यते विष्णुः' इति चैकाक्षरनिघण्टूक्तेर्ब्रह्मविष्णुपरौ ककारैकारौ । 'ईड स्तुतौ' इति धातोरचि स्तुत्य इत्यर्थः; एतस्यर्ग्वेदात्मकत्वादज्द्वयमध्यगतस्य डकारस्य स्थाने ळकार आदेशः 'अग्निमीळे पुरोहितम्' इत्यादिवत् । तदुक्तं बह्वृचप्रातिशाख्ये—'द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकारः' (१—१०) इति । इदमेव च ज्ञापकमाद्यकूटस्यर्ग्वेदात्मकत्वे द्वितीयतृतीयकूटयोर्यजुर्वेदसामवेदात्मकत्वे च । यद्यपि 'कामो योनिः कमला वज्रपाणिः' इत्यत्र वज्रपाणिशब्देन लकार एवोद्धृतो न ळकारः' तथाऽपि लळयोरभेदाभिप्रायेणेदम् । अत एव क्वचित्तन्त्रे त्रिखण्डीगतास्त्रयोऽपि मोहार्णपदेन ळकारा एवोद्धृताः । नपुंसकमिति । अव्ययमित्येव युक्तम्, स्वरादेराकृतिगणत्वात् । अत एव त्रिशत्यामेकोनशततमस्य नाम्नो नमोयोगे चतुर्थ्यां प्राप्तायामपि 'ह्रीं नमः' इत्येव सांप्रदायिकानां प्रयोगः संगच्छते ॥ १३४—१३६ ॥

Ka is Brahman, *E* is Viṣṇu and *A* is S'iva; the word *ĪḌa* signifies praise; the *Ḍa* standing between the two vowels has *Ḷa* as its Ādes'a (substitute). Hence the identity of the first Group with the Ṛg-veda is implied. The identity of the next two Groups in order with Yajus and Sāman becomes thus patent. The name *Hrīṃ* of the substantive, because it indicates *Brahman* is in the neuter gender. The *Brahman* is worthy of being praised by Brahman,

Viṣṇu and Rudra. This is the meaning of the first Group. (134—136)

हसकं तु हसद्वदनं मतं ककारस्य वदनवाचित्वात् ।
यद्वा हस आनन्दः कः सूर्यो हस्तु चन्द्रः स्यात् ॥१३७॥
एतौ लौ नयने यस्य तत्तु कहलं रवीन्दुनेत्रमिति ।
तेन प्रकाशकत्वाच्चिद्रूपत्वं च निगदितं भवति ॥ १३८ ॥
विधिहरिगिरिशेड्यत्वे हेतू एते हसत्वकहलत्वे ।
तेनात्यमितानन्दं चिद्ब्रह्मेति द्वितीयकूटार्थः ॥ १३९ ॥

हसो हास्यम् । अर्शआदित्वान्मत्वर्थीयोऽच् । ततः ककारेण मुखवाचकेन बहुव्रीहिः । हसः को यस्य तदिति विग्रहः । यद्वा हासस्यानन्दजन्यत्वादानन्दे हसपदस्य लक्षणा । कश्च हश्च कहौ, कहौ लौ यस्य तत्कहलम् । 'मुखे सूर्येऽपि कः स्मृतः' 'हः कोपे वरुणे चन्द्रे' 'इन्द्रेऽपि लोचने लः स्यात्' इत्येकाक्षरनिघण्टुः । हसपद-कहलपदयोः कर्मधारयः । एतदर्थप्रतिपादकं मूलमाह—हेतू इति । यतो ह्रीं हसकहलं ततो ह्रीं कएईलमित्यन्वयः ॥ १३७—१३९ ॥

As *Ka* signifies the face, *HaSaKa* would mean a smiling face. Also, *HaSa* means Ānanda (Bliss). *Ka* is the sun while *Ha* would mean the moon. That which has *Ka* and *Ha* (the sun and the moon) for its *La*-s, eyes, is *Ka Ha La*. Hence Its Cid-rūpa-tva (assuming the form of the Supreme Consciousness) is also meant. The two, HaSa-tva and KaHaLa-tva,

form the cause of the *Brahman* being praised by Brahman, Viṣṇu and Rudra. Hence the second Group means: "The *Brahman* is immeasurable Bliss and Supreme Consciousness." (137—139)

सकलकलाभिः सहितं सकलं ब्रह्म तु तृतीयकूटार्थः ।
इत्थं गुणगणकथनाद्विद्याया एष सगुणार्थः ॥ १४० ॥

अत्र सर्वत्र सुलोपः । स्पष्टमन्यत् ॥ १४० ॥

The *Brahman*, comprising all Its Kalā-s and hence known as *SaKaLa*, is the meaning of the third Group. By describing its Guṇa-gaṇa-s (all its attributes) in this manner, the *Sā-guṇārtha* of the Vidyā (is got). (140)

चरमोद्दिष्टं महावाक्यार्थमाह—

विधिहरिशिववचना अपि ककार एकारकोऽकारः ।
सृष्टिस्थितिभङ्गात्मकतत्तज्जनकत्वलाक्षणिकाः ॥ १४१ ॥
ईश्वरवाचीकारो वक्ति डकारः सदाशिवं ताभ्याम् ।
लक्षणया तत्र [1]तिरोधानानुग्रहणकृत्यता गदिता ॥१४२॥

ईकारस्य नामैकदेशन्यायेनेश्वरबोधकत्वम् । 'डो महेशः समाख्यातः' इति वचनेऽपि प्रकृते सदाशिव एवानुग्रहकर्ता विवक्षितः ।

[1] तिरोधाऽनुग्रहकृत्यकारिता.

एतेन 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतावुक्तं ब्रह्मणस्तटस्थ-लक्षणमुक्तं भवति ॥ १४१, १४२ ॥

Although the letters *Ka*, *E* and *A* signify Brahman, Viṣṇu and Rudra, they are to be understood in their secondary sense of Creation, Preservation and Destruction, which are the respective functions of those (Deities). *Ī* signifies Īs'vara and *Ha* implies Sadā-s'iva. By these two letters are to be understood, secondarily, Tiro-dhāna and Anugrahaṇa, the respective functions of those two Deities. (141, 142)

अथ 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्युक्तं स्वरूपलक्षणं द्वितीयकूटेनाह—

हस आनन्दः सत्यं कं हमनन्तं च लं ज्ञानम् ।

'सखा कश्च बुधैः प्रोक्तः' इति कोशात्ककारः सखिवाचकः । सखित्वमाप्तत्वम् । तच्च यथाऽर्थवक्तृत्वमिति शक्यसंबन्धेन प्रकृते सत्यमेव विवक्षितम् । एवं हकारस्य व्योमबीजत्वेन व्योम्नोऽनन्तत्वादनन्तमित्यर्थः । प्रत्यक्षज्ञानजनकलोचनवाचिलकारस्य ज्ञानमर्थः ॥ १४२- ॥

HaSa is Ānanda, *Ka* is Truth, *Ha* is Infinity and *La* is knowledge. (142-)

इत्थं ब्रह्म तटस्थस्वरूपलक्षणयुगेन निर्णीय ॥ १४३ ॥

तदभेदं जीवगणे वक्ति तृतीयेन कूटेन ।

जाग्रत्स्वप्नसुषुप्त्याख्यकलात्रितयेन [1]साहित्यात् ॥ १४४ ॥

[1] सहितत्वात्.

सकलपदं जीवपरं ब्रह्मपरं शक्तिबीजं स्यात् ।
सामानाधिकरण्यात्तल्लक्षितशुद्धयोरभेदार्थः ॥ १४५ ॥
अत्यल्पमिदं कथितं यत्सर्वं खल्विदं ब्रह्म ।
इत्येवं बोधयितुं सकलपदं वा तृतीयकूटगतम् ॥ १४६ ॥
एवमवान्तरवाक्यैर्जीवब्रह्मस्वरूपमभिधाय ।
तदभेदो वर्णित इत्येष महापूर्ववाक्यार्थः ॥ १४७ ॥

'तत्त्वमसि' इति महावाक्ये तत्पदार्थत्वंपदार्थयोरेकविभक्तिमत्त्वरूपसामानाधिकरण्यादभेदो बोध्यते । स च वाच्यार्थयोरसंभवाज्जहदजहल्लक्षणया लक्ष्यपदार्थयोरिति स्थितिः । तत्र तत्पदस्य वाच्यार्थः सृष्ट्यादिकृत्यपञ्चकजनकः । स च 'यतो वा इमानि भूतानि जायन्ते' इत्यादिना श्रुतावुक्तः । लक्ष्यार्थस्तु कृत्यातीतं निर्विशेषं ब्रह्म । तदपि 'सत्यं ज्ञानम्' इत्यादिना प्रतिपादितम् । एवं त्वंपदस्य वाच्यार्थो जाग्रदाद्यवस्थापञ्चकविशिष्टः । स च 'तद्यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति । तद्यथा महामत्स्यः' इत्यादिश्रुतिभिरुक्तः । लक्ष्यार्थस्त्ववस्थाद्यतीतं ब्रह्म । तदपि 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः, न दृष्टेर्द्रष्टारं पश्येः' इत्यादिभिः प्रतिपादितम् । एवमवान्तरवाक्यैर्वाच्यार्थलक्ष्यार्थयोर्निर्णये सति, महावाक्ये लक्ष्यार्थयोरभेदबोधः । यद्यपि श्रुतिषु कृत्यत्रयमवस्थात्रयमेव वर्ण्यते, तथाऽपि तन्त्रानुसारात्तत्पञ्चकोपलक्षणपरत्वेन व्याख्येयं त्रिवृत्करणस्य पञ्चीकरणपरत्वमिव । एवं च प्रकृते तृतीयकूटस्थसकलपदेन कलाभिरवस्थाभिः सहित इत्यर्थकेन

वाच्यार्थस्योक्तावपि लक्ष्यार्थानुक्तेर्न्यूनता । तदर्थं च कूटद्वयमेवावृत्त्या त्वंपदस्य वाच्यार्थलक्ष्यार्थयोः समर्पकत्वेन व्याख्येयम् । अथ वा, तान्त्रिकाणां मते वाच्यार्थयोरप्यत्यन्ताभेदस्य शांभवानन्दकल्पलताकारादिभिरुपपादनात्कूटद्वयेन सृष्टिकर्तृत्वादिविशिष्टस्यावस्थाऽऽदिविशिष्टस्यैव वाच्यार्थस्य समर्पणम्; तृतीयकूटे तु तयोरभेदो जगतो वा संपूर्णस्याभेदो बोध्यते । इह यावान्वक्तव्योऽंशस्तावतः सर्वस्याप्युक्तौ वेदान्तशास्त्रस्यैव कृत्स्नस्यारम्भणीयताऽऽपत्त्योपरम्यते । महापूर्वेति । महांश्चासौ पूर्वश्च वाक्यार्थ इति, महाशब्दः पूर्वो यस्मिन्वाक्ये शब्दे तस्य महावाक्यस्यार्थ इति वा निरुक्तिः । एते चार्था उपलक्षणभूताः । तेन तन्त्रेषु तत्र तत्रोक्तानामन्येषामप्यर्थानां संग्रहः । तथा हि—योगिनीहृदये तावत् 'आत्मनः स्फुरणं पश्येद्यदा सा परमा कला' इत्यारभ्य कांश्चिच्चतुरश्चतुरः पदार्थानुक्त्वा तद्वाचकत्वं कूटत्रयं तुरीयविद्या चेति चतुर्णां शब्दानां प्रतिपादितम्—'कूटत्रितययुक्तस्य सकलस्य मनोः पुनः । एतानि वाच्यरूपाणि कुलकौलमयानि तु ॥' इति । एवं च यावन्ति चतुष्काणि तावन्तो मन्त्रार्थाः । तानि च प्रथमेऽंशे 'पुटधाम—' इत्यादिश्लोकोक्तानि । तत्र हि यद्यपि कूटानां पुटाद्यभेद एवोक्तः, तथाऽपि स वाच्यवाचकभाव एव पर्यवस्यति, शब्दार्थयोस्तादात्म्यस्यैव शक्तिरूपत्वेन पातञ्जले मञ्जूषायां च स्फुटतरमुपपादनात् । एवं कादिमते पञ्चत्रिंशे पटले चतुर्विंशादिभिस्त्रिभिर्व्याकुलाक्षरैः श्लोकैरर्थो वर्णितः—'णैःयाभिर्ल्वताम्रिल तेर्थोधीकयलाऽभिस । णदेरूषेवेणवीशे तमृदिमीनरिस्यादते ॥ १ ॥ त्स्रांतोगशेत्कृषजअ तमृत्ममीलेरिखाकह । तःर्थकस्याथिश्चास्तुत तःन्त्रेगोर्वपितषुस ॥ २ ॥ त्वंकामाम्नानप्रशव्यो नानमसम्निमात्वम्र । रोमईयोकाविंशेत नमृतभान्दुलनान्निवि ॥ ३ ॥' इति । एतेषां वाचनक्रमो यथा—'देवतारथगो मूक (८४६२७३५१) इति यो

वेत्ति न क्रमम् । स व्याकुलाक्षरे मूको देवतारथगोऽपि सन् ॥' इति[1] । तृतीयकूटे वर्णत्रयं सर्वार्थकम्; तुर्यमक्षरं देव्यर्थकम्; तेनायमर्थः संपन्न इति प्रथमश्लोकस्यार्थः'। सर्वं जगद्देवीरूपमेवेत्यर्थस्तन्त्रान्तरेषु गोपित इति द्वितीयश्लोकस्य । लज्जाबीजस्थैश्चतुर्भिरक्षरैर्यत्प्रकाशकं यच्च ग्रसिष्णु, तयोर्यत्सामरस्यं तत्तादात्म्यं द्वितीये प्रतिपाद्यत इति तृतीयस्य । प्रकाश-ग्रासशब्दौ तूत्पत्तिसंहारयोर्विद्याऽविद्ययोर्वा वाचकाविति । अयमप्यर्थः 'अत्य-ल्पमिदं कथितम्' इति श्लोके सूचितः । एवं चात्र 'पुटधाम—' इति श्लोके त्रयोदशार्थाः; गायत्र्यादिपञ्चदशार्थेषु भावार्थाश्चत्वारः, नामार्थास्त्रयः, शाक्तार्थौ द्वौ, कौलिकार्थेऽपि गणेशादिरूपत्वस्य देवीविद्या-चक्रभेदेन त्रैविध्यम्, महावाक्यार्थेऽपि द्वैविध्यमिति चतुर्दश; शेषा दश; इति मिलित्वा सप्तत्रिंशदर्थाः । नामैकदेशार्थे त्वनन्ता भेदा उक्ताः । एवं बहुतन्त्रद्रष्टृभिरन्येऽप्यर्थाः संग्राह्याः ॥ १४३—१४७ ॥

Having ascertained, in this manner, the *Brahman*, through Its Taṭa-stha- and Svarūpa- lakṣaṇa-s (qualities), (the Mantra) establishes the identity (of the *Brahman*) with species of Jīva-s in the following manner: The term *SaKaLa* refers to Jīva, as the latter has the three Kalā-s, Jāgrat, Svapna and Suṣupti. *Hrīṃ*, the S'akti-bīja, denotes the S'akti. As there is opposition

[1] ललितायास्त्रिभिर्वर्णैः सकलार्थोऽभिधीयते ।
शेषेण देवीरूपेण तेन स्यादिदमीरितम् ॥ १ ॥
अशेषतो जगत्कृत्स्नं हृल्लेखाऽऽत्मकमीरितम् ।
तस्याश्चार्थस्तु कथितः सर्वतन्त्रेषु गोपितः ॥ २ ॥
व्योम्ना प्रकाशमानत्वं ग्रसमानत्वमग्निना ।
तयोर्विमर्श ईकारो बिन्दुना तन्निभालनम् ॥ ३ ॥

between the two, the pure things implied by them are identical. Thus far, only a very little has been said. The term *SaKaLa* of the third Group is used to imply that all this is *Brahman*. Having in this manner described the form of the Jīva and the *Brahman* by means of suggestive sentences, their identity has been established. This then is the *Maha-vakyartha*. (143—147)

शक्त्या लक्षणया वा ये येऽर्था दर्शिता मनोरस्य ।
तेषु न कोऽपि विवादः प्रत्यक्षेणैव सिद्धत्वात् ॥ १४८ ॥

मनोर्मन्त्रस्य । प्रत्यक्षेणेति । शक्तिग्राहकव्याकरणकोशादेः शक्यसंबन्धस्य च स्फुटं प्रदर्शनादिति भावः ॥ १४८ ॥

No controversy can arise about the meanings, whether primary or secondary, that have been given herein to this Mantra, as such meanings carry a clear conviction on bare presentation (to the mind). (148)

ये पुनरिह भावार्थादयः षडर्था मनोरुक्ताः ।
तेषु यदि शक्तिभक्ती न हि संभवतस्तदाऽपि का हानिः ॥

शक्तिग्राहकव्याकरणाद्यभावान्न शक्तिः; अत एव च न शक्यसंबन्धरूपा भक्तिरपि । व्यक्तिरूपा तृतीया वृत्तिर्भविष्यति, 'वक्तृबोद्धव्यकाकूनामन्यसंनिधिवाच्ययोः । प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम्' इत्यत्रादिपदेनोपासनाऽपि ग्रहीष्यत इत्याशयेन समाधत्ते—का हानिरिति ॥ १४९ ॥

If, in the six meanings beginning with the Bhāvārtha that have been attributed to this Mantra, there has been no possibility of the application, either of its primary or secondary sense, what harm is there? (149)

व्यञ्जनाया बहुभिरनङ्गीकारादाह—

आस्तामन्या वृत्तिर्विलक्षणा तद्ग्रहस्तु मनोः ।
शिववचनेन भविष्यति यद्वैषा शक्तिरेवास्तु ॥ १५० ॥
एतस्मादयमर्थो बोद्धव्य इतीश्वरेच्छात्वात् ।

अन्या शक्तिभक्तिव्यक्तिभ्यो विलक्षणा शक्त्यादित्रितयप्रक्रियातो विलक्षणप्रक्रियाशालिनी । उच्छृङ्खलस्य पन्थानं परित्यज्याह— यद्वेति । शिवेनैवास्यायमर्थ इति स्पष्टमुक्तत्वादिति भावः ॥ १५०, १५०- ॥

Let there be any sense quite different (from the primary and secondary); the acceptance of any such sense of the Mantra has to be determined by the words of S'iva. In other words such sense may even be considered as the primary one. (150)

For, it is the desire of Īs'vara that such and such meaning should be conveyed by such and such (word). (150-)

प्रतिपदमर्थविशेषाज्ञानेऽप्यास्तामखण्डवाक्यस्य ॥ १५१ ॥
अर्थोऽप्यखण्डरूपो विशिष्टमतिरिक्तमिति हि सिद्धान्तः ।
आसेचनकव्याप्त्यादिपदवदास्तां पदत्वमपि ॥ १५२ ॥

इदं पदमिममर्थं बोधयत्वितीच्छायामर्थबोधजनकत्वनिष्ठप्रकारता-निरूपितविशेष्यताशालित्वेन पदस्यापि विषयत्वात्प्रकृते प्रतिपदमर्थानुक्तेः कथं शक्तिरिति चेन्न; इदं वाक्यमिममखण्डार्थं बोधयत्वित्याकारिकाया एवेच्छायाः कल्पनात् । वाक्यस्याखण्डत्वं वैयाकरणानामिष्टमेव । अर्थ-स्याखण्डत्वम् 'प्रकृष्टप्रकाशश्चन्द्रः' इत्यादिवाक्यार्थं वर्णयतामौपनिषदाना-मिष्टमेव । तच्च विचार्यमाणे विशिष्टस्यातिरिक्तत्व एव पर्यवस्यति । तथा च यत्र प्रतिपदमर्थविवेकस्तत्रेयं रीतिः; यत्र यत्र न स तत्र संपूर्णस्यैकपदत्वमेवास्तु । न चैकस्य पदस्य विशिष्टबह्वर्थवाचकत्वमदृष्टमिति वाच्यम्, घटत्वघटसमवायानां घटपदवाच्यत्वात्, 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्' इति कोशात्, हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगि-साध्यसामानाधिकरण्यस्य व्याप्तिपदार्थत्वाच्चेत्याह—आसेचनकेति। आदिनो-पाधिपरिग्रहः । तेनेश्वरेच्छायां पदस्यैव विशेष्यत्वेऽपि न प्रकृतनिर्वाहाय विलक्षणेच्छाकल्पनाऽऽपत्तिः ॥ -१५१, १५२ ॥

What if the meanings, ***verbatim***, are not known? Enough if the sense as a whole of the whole sentence is understood. The accepted theory in this matter is that the spirit is quite different from the letter. If need be, the whole Mantra may be treated as a single word, as in the case of ***Āsecanaka***, ***Vyāpti***, etc. (-151, 152)

नन्वस्य पदत्वेऽनेकार्थत्वं दोष इत्यत आह—

एकस्यानेकार्था दृष्टा हरिसैन्धवादिषु पदेषु ।
अन्यतमैकावगतौ प्रकरणतात्पर्ययोर्विशेषकता ॥ १५३ ॥

प्रकृते तु सर्वबोधस्येष्टत्वान्नो विशेषकाकाङ्क्षा ।
अथ वा सकलार्थेष्वपि शक्त्यैक्यं पुष्पवन्तपदवदिह ॥

अनेकार्थताया: प्रमाणबलयातत्वाददोषत्वम् । सर्वत्रानेकार्थस्थलेऽन्यतमस्यैकस्यैव बोधनार्थं प्रकरणादिज्ञानस्य कारणत्वादिकल्पनदोषः, प्रकृते तु तदभाव इत्याह—अन्यतमेत्यादिना । अथ वा, ईश्वरेच्छाविषयीभूतबोधीयविशेष्यता यथा सूर्याचन्द्रमसोः पर्याप्तैकैव स्वीक्रियत इति न तत्र पुष्पवन्तपदे शक्त्यनेकत्वम्, तद्वदिहाप्यस्त्वित्याह—अथ वेति ॥ १५३, १५४ ॥

A single word conveys more than one sense; *e.g.*, in the words *Hari*, *Saindhava*, etc. In accepting one of several meanings, the context and the aim are the two indices. (153)

As, in the case on hand, all implications are desirable there is no need for any index. To argue in another way (in this Mantra) one S'akti embraces all the senses, as in the word *Puṣpa-vanta*. (154)

यत्र प्रतिपदमर्थस्तान्प्रत्यस्यास्तु वाक्यत्वम् ।
क्वचनावान्तरवाक्यं समासवाक्यं महावाक्यम् ॥ १५५ ॥

यत्र गायत्र्यर्थनामार्थादिषु । अवान्तरवाक्यं सगुणार्थवयवार्थादौ । अवान्तरवाक्यत्वं नाम वाक्यसमूहभिन्नत्वे सति पदसमूहत्वमेव, न पुनर्महावाक्यौपाधिकत्वरूपं प्रकृते । समासवाक्यं समस्तार्थे । महावाक्यं चरमेऽर्थे ॥ १५५ ॥

In those cases wherein it has been held that every word has a corresponding meaning, this Mantra may be treated as a sentence; in some cases as Avāntara (leading) vākya, in others as Samāsa-vākya, and in one other case as Mahā-vākya. (155)

एकस्यानेकार्थे विनियोगादर्थबाहुल्यम् ।
वेदे बहुशः स्वीकृतमत्र त्वेकत्र विनियोगात् ॥ १५६ ॥
अखिलार्थबोधनियमो नियमादृष्टं प्रकल्पयति ।
सिद्धे प्रमाणदार्ढ्ये सकलं कल्प्यं हि तदविरोधाय ॥१५७॥

पदपक्षेऽनेकार्थतादोषपरिहारवद्वाक्यपक्षेऽपि संभवति, पुरुषसूक्तस्य तत्तद्देवतापूजायां विनियोगेनानेकार्थत्वस्येष्टत्वात् । इयांस्तु विशेषः— तत्तत्पूजायां तस्य तस्यैवार्थस्य स्मरणं पुरुषसूक्ते; प्रकृते तु सर्वेषामर्थानां स्मरणेनैवादृष्टोत्पत्तिरिति भावः ॥ १५६, १५७ ॥

In the Veda it has been recognized that by the application of one (Mantra) in several contexts various meanings are conveyed. But in this case, as the Mantra relates to only one context the implication of all possible meanings forms the condition precedent leading to the Niyamādṛṣṭa (consequence to be obtained). If the authority of a statement is once strongly established, every thing leading to it has to be conceded with a view not to contravene such statement. (156 & 157)

सिद्धे प्रमाणदार्ढ्ये इत्यत्र दृष्टान्तमाह—

यागस्य स्वर्गं प्रति संसिद्धे हेतुहेतुमद्भावे ।
तदनुपपत्तिं निरसितुमलौकिकापूर्वमपि क्लृप्तम् ॥ १५८ ॥

'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र तृतीयाश्रुत्या यागस्य जनकत्वे काम्यमानतया स्वर्गस्य जन्यत्वे च बोधितेऽपि भिन्नकालीनयोस्तदयोगाद्देवताप्रसादयागध्वंसादिनाऽत्र निर्वाहाभावादपूर्वेणैवानुपपत्तिनिरास इत्यादि तन्त्रान्तरेषु विस्तरः ॥ १५८ ॥

Even though it is accepted (on the authority of the Veda-s), that Yāga and Svarga are related (to each other) as antecedent and consequence, (an intermediary stage) A-pūrva, not known to the world, has to be conceded so as to avoid the (apparent) absence of contiguity (between the two). (158)

अस्मिन्प्रकरणे पूर्वं वर्णितान्पञ्चदशार्थान्संगृह्यानुवदति—

विद्यावर्णेयत्तोद्धारः कालस्तदुच्चारः ।
उत्पत्तिस्थानं तद्यत्नो रूपं स्थितिस्थानम् ॥ १५९ ॥
आकारः स्वं रूपं विभाव्यमर्थोऽन्तरङ्गाणि ।

विद्यायां वर्णेयत्ताऽष्टपञ्चाशद्रूपा वर्णसंख्या । उद्धारः 'क्रोधीशः श्रीकण्ठारूढः' इत्यादिनोक्तः । कालस्त्रिलवोनैकत्रिंशन्मात्राऽऽत्मको विद्यायाः, एकलवोना ऊनत्रिंशन्मात्रा उच्चारणस्य । उच्चारणम् 'इत्येवं वर्णा-

नाम्' इत्यादिसार्धश्लोकत्रयेणोक्तम् । उत्पत्तिस्थानम् 'कण्ठे च कण्ठतालुनि' इत्यत्रोक्तम् । यत्नो बाह्यश्चान्तरश्च । रूपादित्रयम् 'प्रलयाग्निनिभम्' इत्यादिनोक्तम् । स्वं रूपम् 'व्यष्टिसमष्टिविभेदात्' इत्यादिनोक्तम् । विभाव्यमवस्थापञ्चकादि । अर्थो गायत्र्यर्थादिरूपः । इमान्यन्तरङ्गत्वादुपासकानामत्यावश्यिकानि ॥ १५९, १५९- ॥

The number of letters contained in the Vidyā, Uddhāra (the process of drawing out), Kāla (Mātrā-periods), pronunciation, places of origin, the (requisite) efforts, appearances, positions, shapes form *par excellence*, the different states and meanings, these form the internal limbs of the Vidyā. (159, 159-)

ऋषयश्छन्दोदैवतविनियोगा बीजशक्तिकीलानि ॥ १६० ॥
न्यासा ध्यानं नियमाः पूजाऽऽदीनि बहिरङ्गाणि ।
बाह्यान्यङ्गानि पुनः प्रायो लोके प्रसिद्धकल्पानि ॥ १६१ ॥

ऋषयो हयग्रीवादयः । छन्दांसि पङ्क्त्यादीनि । दैवतं त्रिपुरसुन्दरी । विनियोग इष्टार्थजनकत्वे । बीजं वाग्भवादि । शक्तिः पराऽऽदिः । कीलकं कामराजादि । न्यासा ऋष्यादिन्यासजालम् । ध्यानम् 'अरुणां करुणातरङ्गिताक्षीम्' इत्यादिना कथितम् । नियमाः पुण्ड्रेक्षुदण्डभक्षणवर्जनसंकल्पादयः । पूजाः पात्रासादनादिशान्तिस्तवान्ता नित्यादिभेदेन त्रिविधाः, पराऽऽदिभेदादपि त्रिविधाः, केवलादिभेदात्पञ्चविधा अपि । आदिना होमतर्पणादिपरिग्रहः । एतानि बहिरङ्गत्वेनावश्यिकानि । प्रसिद्धकल्पानि, ईषन्न्यूनप्रसिद्धिमन्ति । प्रायः प्रसिद्धानीत्यर्थः । कल्पप्प्रत्ययः ।

तानि च प्रकनशवरिवस्याविधौ प्रपञ्चितान्यस्माभिः । अतोऽत्र ग्रन्थे नोक्तानीति भावः ॥ -१६०, १६१ ॥

The Ṛṣi-s, Chandas-s (metres), Devatā-s, Vīniyoga (application), Bīja-s, S'akti-s, Kīlaka-s, Nyāsa, Dhyāna, Niyama-s, Pūjā-s, etc., are its external limbs. The external limbs are, for the most part, well-known to the world. (-160, 161)

दुर्लभमान्तरमङ्गं प्रायोऽन्तर्मुखजनैस्तदादृत्यम् ।
तोषायैषा तेषामतः प्रदिष्टा रहस्यवरिवस्या ॥ १६२ ॥

अन्तर्मुखैर्विषयेष्वनासक्तचित्तैर्जनैः । प्रदिष्टोपदिष्टा, 'विद्ययोः पथि मुनिप्रदिष्टयोः' इति कालिदासप्रयोगात् ॥ १६२ ॥

The internal limbs, on the other hand, are most of them rarely understood. They should be pursued by Upāsaka-s. Hence, this work Rahasya-varivasyā, has been expounded for their delectation. (162)

एतामुत्सृज्य जडैः क्रियमाणा बाह्यडम्बरोपास्तिः ।
प्राणविहीनेव तनुर्विगलितसूत्रेव पुत्तलिका ॥ १६३ ॥

बाह्यो डम्बरोऽङ्गविस्तारो यस्यां सा । प्राणसूत्रयोरन्तरङ्गत्वात्तद-भावेन यथा तयोर्न कार्यक्षमता तथेति भावः ॥ १६३ ॥

The pursuit (of the S'rī-vidyā) by the fanatics who adhere merely to the external ostentations losing sight

of the essentials (as expounded in the work) is very much like the body wherefrom life is extinct, and a marionette from which the strings have been removed. (163)

बीजान्मूलं मूलात्क्षेत्रस्यान्तःस्थबाह्यविस्तारौ ।
यद्यप्यनयोः साम्यं प्राधान्यमथापि चान्तरङ्गस्य ॥ १६४ ॥

बीजात्कामकलारूपाद्वाग्भवादिरूपाच्च । मूलं वृक्षपादो मन्त्रश्च । क्षेत्रस्य शरीरस्य केदारस्य च । यद्यप्यनयोः साम्यं बीजजन्यत्वाविशेषात्; तथाऽपि 'अन्तरङ्गनाशे बाह्याङ्गसहितवृक्षनाशः, बाह्याङ्गमात्रनाशेऽपि न वृक्षस्य नैवाऽन्तरङ्गस्य नाशः' इत्यस्य प्रसिद्धत्वादिति भावः ॥ १६४ ॥

Out of the seed (Kāma-kalā-bīja) evolves the root (Mūla-mantra); out of the root (Mūla-mantra) evolve the parts of the plant (human body), above and below the soil (external and internal). Though both of them are of equal importance, more importance has to be attached to the subsoil (internal) parts. (164)

यद्यपीमान्यावश्यिकतरत्वादत्र ग्रन्थे निबद्धानि, तथाऽपि पाण्डित्यबलादेतद्ग्रन्थावलोकनादेव गुरुमनपेक्ष्य स्वीकारः पापायेत्याह—

सद्गुरुकुलतः कृपया लब्धा कामानियं सूते ।
निजबुद्धिमात्रजन्या पापं कन्या यथा स्वीया ॥ १६५ ॥

पापं सूत इत्यन्वयः । सद्गुरोः 'सुन्दरः सुमुखः स्वस्थः' इत्यादितन्त्रराजोक्तलक्षणविशिष्टस्य । कृपया सेवाजनितप्रसादेन, 'पारंपर्यविहीना

ये ज्ञानमात्रेण गर्विताः । तेषां समयलोपेन विकुर्वन्ति मरीचयः ॥' इति वचनात् । मरीचयो डाकिन्यादयः । विकुर्वन्ति धातुविकारप्रापणेन मारयन्तीत्यर्थः । कन्यापक्षे सद्गुरुः श्वशुरः ॥ १६५ ॥

This Varivasyā (maid), duly courted by a person from the house of the Guru (father-in-law) with his grace, brings about the accomplishment of his heart's desires; while, if courted by him impelled by his own blind passions, she leads him into the path of sin (astray). (165)

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते' इति वचनादन्ते मङ्गलमारचयति—

अकथासनं ह्-ळक्षान्तरं समासाद्य मामकं ज्ञानम् ।
मामकमेवानन्दं मह्यं ददतो जयन्ति गुरुचरणाः ॥ १६६ ॥

कथानां वाचामनासनमविषयम् । वाच्यकक्ष्यामतिक्रान्तमिति यावत् । हेति निश्चये । लक्षस्य लक्षणाया अन्तरमवकाशो यस्मिंस्तत् । पक्षे, सहस्रारपद्मकर्णिकामध्यगतत्रिकोणरेखा आदिकादिथादिषोडशार्णत्रयरूपाः, तन्मध्ये कोणेषु हकारादित्रयम्, तत्र तन्त्रेषु गुरुध्यानं कथितम् । तादृशमासनमित्यर्थः । मामकमात्माभिन्नम् ॥ १६६ ॥

May my venerable Guru triumph, who, seated on the Akathāsana (triangle with *A*, *Ka* and *Tha* series as its sides) with *Ha*, *Ḷa* and *Kṣa* at the angles, bestows

on me Knowledge and Bliss, identical with the Ātman, which transcends all description and could at best be subject to Lakṣaṇā (indirectly comprehended). (166)

गुरुचरणैकसहायो भास्कररायो जगन्मातुः ।
वरिवस्याऽतिरहस्यं वीरनमस्यं प्रजग्रन्थ ॥ १६७ ॥

वीरैः, अहमि रणाङ्गण इदमो वैरिणो नाशं कुर्वाणैः परापश्चाशिकाऽऽदौ प्रसिद्धैः । इति सर्वमनवद्यम् ॥ १६७ ॥

Bhāskara-rāya, having for his soul guide his venerable Guru's feet, wrote the Varivasyā-rahasya (the secret of worship) of the World-Mother, adored by the valiant [who vanquish their opponent *Idam* (the phenomenal world around them) on the field of *Aham* (Ego)]. (167)

वस्तु प्रस्तुतमस्तु निस्तुलमहःस्तोमास्तितावास्तु नो
हस्तन्यस्तसमस्तपुस्तकभरध्वस्तासदेनस्तति ।
शस्तस्वस्तिकृदस्तदुस्तरतमः स्वस्तोकसौवस्तिकं
गीस्तोयस्तनयित्नुसुस्तनयुगं वास्तोष्पतिप्रस्तुतम् ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणसर्वतन्त्रस्वतन्त्रश्रीनृसिंहानन्दनाथ-
चरणारविन्दमिलिन्देन श्रीमद्गम्भीररायभारतीदीक्षितात्मजेन
भास्कररायापरनाम्ना भासुरानन्दनाथेन प्रणीतं
सव्याख्यानं वरिवस्यारहस्यं संपूर्णम् ।

प्रदेशसूचिका

संज्ञाविवृतिः

अ० अष्टाङ्गहृदयम्
आप० श्रौ० सू० आपस्तम्बश्रौतसूत्रम्
उ० उणादिसूत्रम्
ऋ० सं० ऋक्संहिता
ए० को० एकाक्षरकोशः
ऐ० आ० ऐतरेयारण्यकम्
क० उ० कठोपनिषत्
का० प्र० काव्यप्रकाशः
का० वि० कामकलाविलासः
का० वृ० काशिकावृत्तिः
ग० पा० गणपाठः
गी० गीता
छा० उ० छान्दोग्योपनिषत्
जै० सू० जैमिनिसूत्राणि
ज्ञा० त० ज्ञानार्णवतन्त्रम्
तन्त्राभि० तन्त्राभिधानम्
त० रा० तन्त्रराजतन्त्रम्
तै० उ० तैत्तिरीयोपनिषत्
तै० ब्रा० तैत्तिरीयब्राह्मणम्
तै० स० तैत्तिरीयसंहिता
त्रि० उ० त्रिपुरोपनिषत्
त्रि० ता० त्रिपुरातापिनी
द० सं० दक्षिणामूर्तिसंहिता
दे० भा० देवीभागवतम्
दे० भा० व्या० देवीभागवतव्याख्या
धा० धातुपाठः
नाम० नामलिङ्गानुशासनम्
ना० र० नानार्थरत्नमाला
नृ० ता० नृसिंहतापिनी
न्या० सू० न्यायसूत्रम्
पा० यो० पातञ्जलयोगसूत्रम्
पा शि० पाणिनिशिक्षा
पा सू० पाणिनिसूत्रम्
पि० सू० पिङ्गलसूत्रम्
प्रा० प्रातिशाख्यम् (तैत्ति०)
फुल्ल० फुल्लसूत्रम्
ब० प्रा० बह्वृचप्रातिशाख्यम्
बृ० उ० बृहदारण्यकोपनिषत्
ब्र० सू० ब्रह्मसूत्रम्
म० ना० महानारायणोपनिषत्
म० भा० महाभाष्यम्
मा० को० मातृकाकोशः
मु० उ० मुण्डकोपनिषत्
यास्क० यास्कनिरुक्तिः

	गुदोपरि द्वयङ्गुलोर्ध्वे मूलाधारः	भारती ब्रह्मा	लिङ्गे स्वाधिष्ठानम्	भूमिः विष्णुः	नाभौ मणिपूरकम्	ई-मिथुनम् र-रुद्राणी ह-रुद्रः	हृदि अनाहतम्	विष्णुः भारती ब्रह्मा	कण्ठे विशुद्धिः	भूमिः ब्रह्मा	भ्रूमध्ये आज्ञा	भूमिः विष्णुः भारती	ललाटमध्ये सहस्रारम् (स्वप्नः जागरः)	सुषुप्तिः / तुर्या ऽवस्था / तुर्यातीता ऽवस्था
दलानि	४		६		१०		१२		१६	स्वप्नः	२		१०००	बिन्दुः, अर्धचन्द्रः, रोधिनी, नादः, नादान्तः, शक्तिः, व्यापिका, समना
अक्षराणि	व-स		ब-ल		ड-फ		क-ठ		अ-अः		ह, क्ष			
परिवारः	वरदाऽऽदिः		बन्दिन्यादिः		डामर्यादिः		कालरात्र्यादिः		अमृताऽऽदिः		हंसवत्यादिः		अमृताऽऽदिः	
योगिन्यः	साकिनी		काकिनी		लाकिनी		राकिणी		डाकिनी		हाकिनी		याकिनी	
धातवः	अस्थि		मेदः		मांसम्		असृक्		त्वक्		मज्जा		शुक्रम्	
कृत्यानि				सृष्टिः				स्थितिः				संहारः		अनाख्या
त्रिपुटी				ज्ञाता				ज्ञानम्				ज्ञेयम्		मामस्थम्
चक्राणि				अग्नि-				सूर्य-				सोम-		ब्रह्म-
नाथाः				मित्रेश-				षष्ठीश-				उड्डीश-		चर्याऽऽनन्द-
अवस्थाः				जागरः				स्वप्नः				सुषुप्तिः		तुर्या
शक्तयः				वामा				ज्येष्ठा				रौद्री		शान्ता
				इच्छा				ज्ञाना				क्रिया		अम्बिका
				कामेश्वरी				वज्रेश्वरी				भगमालिनी		महात्रिपुरसुन्दरी
आत्मानः				आत्मा				अन्तरात्मा				परमात्मा		ज्ञानात्मा
तत्त्वानि				आत्म-				विद्या-				शिव-		सर्व-
पीठानि				कामगिरिः				पूर्णगिरिः				जालंधरः		ओड्याणम्
आम्नायाः				प्राक्-				दक्षिण-				पश्चिम-		उत्तर-
लिङ्गानि				स्वयंभू-				बाण-				इतर-		पर-
मातृकाः	परा				पश्यन्ती		मध्यमा		वैखरी					
						वह्निकुण्डलिनी		सूर्यकुण्डलिनी				सोमकुण्डलिनी		

१. वा ग्भ व कू ट म् — (९) भूपुरम्, त्रैलोक्यमोहनम्, (८) षोडशदलम्, सर्वाशापरिपूरकम्, (७) अष्टदलम्, सर्वसंक्षोभणम्.

२. का म रा ज कू ट म् — (६) चतुर्दशारम्, सर्वसौभाग्यदायकम्, (५) बहिर्दशारम्, सर्वार्थसाधकम्, (४) अन्तर्दशारम्, सर्वरक्षाकरम्.

३. श क्ति कू ट — (३) अष्टारम्, सर्वरोगहरम्, (२) त्र्यश्रम्, सर्वसिद्धिप्रदम्, (१) बिन्दुः मनोन्मनी

